Shri Raghunath Temple MSS. Library,
JAMMU

No. १३८१

Title भवानन्दी प्रकाशे सामान्य लक्षण प्रकाश:

Author महादेव पण्डित:

Extent ५५ Age ×

Subject न्याय शास्त्रं

सामान्यलक्षण प्रकाश:

अनुमानमणिदीधितिव्याख्यो भवानन्दीव्या
ख्याने भवानन्दीप्रकाशाभिधे सामान्यल
क्षणप्रकाश:

१३८१

पत्रे ५५

पत्रे ८२

श्रीमन्महागंगणपतये नमः ॥ दीधितावनंगीकारे चेति संशयत्वस्यार्थस्य यत्र
स्तत्तया कार्यतावच्छेदकत्वेन तद्धेतुत्वे मानाभावादिति भावः अपि नात्र हेतु
त्वांगीकारसमुच्चयः संशय एवेति । एवकारोवधारणे व्याख्यायां स्यादिति । तथा
च तद्धर्मितावच्छेदककतद्धोतत्प्रकारकज्ञानस्य हेतुतायां विशेष्यतावच्छेदकप्रकार
कज्ञानविधयावश्यकत्वात्तत्र समानविषयकत्वनिवेशे प्रयोजनाभावेन तस्यैव
स्वप्रकारवत्त्वसंबंधेन संनिकर्षत्वकल्पनाद्भासमानधर्मिणं संशयविषयत्वा
नुपपत्तिः प्रसिद्धधूमविशेष्यकधूमत्वप्रकारकज्ञानस्यैव सत्त्वादिति भावः दीधि
ताव विषयाद्यादि तिसामान्यलक्षणायाः प्रत्यासत्तित्वस्येत्यादिः तद्धर्मप्रकार
केति तथा च धर्मज्ञानस्य धर्मिणं प्रत्यासत्तित्वमेव सामान्यलक्षणायाः प्र
त्यासत्तित्वं न तु ज्ञानलक्षणयाइति भावः व्याख्यायां । संप्रतिपत्तौ सर्ववादिसिद्ध
त्वे । लाघवादाह स्वाश्रयविशेष्यकेति न सार्वज्ञ्येति निर्विकल्पकस्य जन्यतावच्छेदका

नां क्रांतद्यादितिभावः तत्सद्रूपत्वादिति। आदिनात्तद्वृत्तिधर्मांप्रकारकत्वपरिग्रहः तद्वृत्ती
त्वस्य च सामान्यवृत्तीत्वर्थ इति ध्येयम् नन्वेवं ज्ञानलक्षणैवैयर्थ्यं ईश्वरज्ञानरूप
सामान्यप्रत्यासत्त्यैवोपपत्तेरत आह इत्थं चेति। सर्वत्र सामान्यप्रत्यासत्ति अन्यज्ञाना
पत्तेराह यत्र चेति विशिष्ट धर्मनिवेशप्रयोजनमाह न घटत्वादि ति विशेष्येंद्रिय
नि वेश प्रयोजनमाह न चेतितत्वापीति तथापि घटत्वादेरिव प्रमेयत्वादेः प्रत्या
सत्तित्वोपगमादिति भावः प्रत्यासत्तितायाइति विशेषणतावशेषेत्यादिः
हेतुत्वस्येति धर्मितावच्छेदकप्रकारकज्ञानविधयेत्यादिः तेन घटत्वादेः प्रत्यास
त्तित्वादिनाप्याकाशाभावादीनां प्रत्यासत्तित्वोपगमेन तेषां प्रत्यासत्तित्वाप
त्या कथमपीश्वरज्ञानस्य प्रत्यासत्तित्वखंडनमित्याशंकापि निरस्ता धर्मिताव
च्छेदकप्रकारकज्ञानस्यैव प्रत्यासत्तित्वोपगमात्। सामानाधिकरण्येन। सामाना
धिकरण्यमात्रेण। एवमग्रेपि। ननु तद्विषयता निरूपितविषयतासंबंधेन

भवानं·दी
१ तद्बुद्धिं प्रति तदभावविषयतानिरूपितविषयतासंबंधेन तदभावनिश्चयस्य समानविष-
यकतामात्रेण प्रतिबंधकत्वं कल्प्यते न तु प्रतिबंधकतावच्छेदककोटाववच्छेदकत्वविष-
२ यतापि निवेश्यते गौरवात् तथा च प्रसिद्धधूमे संशयोनुपपन्न एव व्याप्तिनिश्चयसत्त्वा-
दिति सामान्यलक्षणावश्यकीत्यत आह। दीधितौ कथमन्यथेति। व्याख्यातां समान-
विषयकत्वेति उक्तरीत्येत्यादिः संदेहोपपादनेपीति सामान्यलक्षणयेत्यादिः कुत्र
संदेह इति तथा चात्र सामान्यलक्षणयापि न संदेहोपपत्तिरिति भावः भवत्वेवं इति
। तथा चोक्तरूपविषयकसंशयानुपपत्त्या तत्समानाधिकरण्यमात्रावगाहि विशिष्टबु- राम
द्धौ तदवच्छेदेन विरोधि निश्चयस्यैव विरोधितयोक्तरीत्या समानविषयकतया विरोधि- १
त्वाभावेन प्रसिद्धधूमेपि संशयोपपत्तौ न तदनुरोधेन सामान्यलक्षणावश्यकत्व-
मिति भावः समानविषयकतामात्रेणैव विरोधित्वं अतिरिक्तसंभावनाया उक्तेज-
कत्वाभ्युपगमाच्च नोक्तरूपविषयकसंशयानुपपत्तिरित्याशयेनाशंकते दीधितौ

न चेति। व्याख्यायां अनुपस्थितातिरिक्तेति कर्मधारयः अतिरिक्तसंभावनापदार्थविकामि
दूषयतीति दीधितौ यत्तु इत्यादिनारूपेऽपीति न चैतस्याः संभावनायाः पूर्वपक्षिणानभि
मततया तस्या अतिरिक्तसंभावनापदार्थत्वखंडनं निष्प्रयोजनमिति वाच्यं। वादि
वाक्ये यावंतोऽर्थाः संभवंति तावतां दूषणस्यैव सांप्रदायिकत्वात् रूपाद्यत्र रूपमि
ति। न चोद्देश्यतावच्छेदकविधेययोरैक्येनासंशाब्दत्वानुपपत्त्या प्रत्यक्षत्वमेव वाच्यं तथा
च रूपाद्यत्वेन सकलरूपाद्योपस्थित्यर्थं सामान्यलक्षणावश्यकीति वाच्यं। अ
स्यानुमितिरूपतया तन्मूलकप्रत्यक्षरूपतया वा तस्या अनावश्यकत्वात्। इत्याद
य इत्यादिपदं कर्मादिपरमित्याशयेनाह व्याख्यायां इत्यकर्मेति दीधितौ रसादय
इत्यादिपदात् गंधादिसकलगुणपरिग्रहः समानविषयकत्वेन प्रतिबंधकत्वे
पि समानधर्मितावच्छेदकत्वं निवेशनीयमित्याशयेनाह व्याख्यायां संशयेति न तद्रि
तरूपेसेति समानविषयकत्वेन प्रतिबंधकतामते महानसीयधूमो वह्निव्याप्य

इति निर्णयस्यापि धूमत्वेन तद्विषयके धूमो वह्निव्याप्यो न वेति संशये प्रतिबंधकतया त
दुपपत्तये तदवच्छेदकं समानधर्मितावच्छेदकत्वं न पर्याप्तिघटितमिति सूचनाय तद्
धर्मेति स्य उत्क्रान्तत्वघटितरूपेणोपन्यस्तं अत एव समानधर्मितावच्छेदकत्वान्तर्भावेण
प्रतिबंधकत्वादेव तद्धूमत्वेन तद्धूमव्यक्तित्वेन एतदपि। संशयस्येत्यादिनोक्तविरोधि
त्वमपि। समानविषयकतामात्रेण प्रतिबंधकतावादिमते वस्तुगत्या तत्र समानध
र्मितावच्छेदककत्वान्तर्भाव इत्याशयेनाहाभ्युपेत्येति। उपपादयति। प्रसिद्धरूपभि
न्नत्वधर्मितावच्छेदकविशेषदर्शनप्रदर्शने मातिरिक्तसंभावनाया अप्रयोगमुपपादयति।
प्रसिद्धरूपेति पृथिव्यादिरूपे वायुत्वाभावव्याप्यता निर्णयसत्त्वे इत्यादि संशयायोग्या राम
त्ररूपं वायुत्वाभावव्याप्यं न वेति संशयायोगात्। तत्स्वरूपं वायुवृत्ति न वेति संश ३
यपर्यवसानेन तद्धानीमननुभवादिति भावः तद्घटितेति प्रसिद्धरूपभिन्नत्वघ
टितेत्यर्थः रसादिवेति अत्रादिना गंधादिसकलगुणकर्मादिसकलपदार्थप

रित्यग्रहः दीधितौ तत्सर्वमिति अत्र तेषां सर्वेषां विशेषदर्शनविषयत्वबोधनाय सर्वमित्युक्तं ननु धर्मि
तावच्छेदकावच्छिन्नत्वबोधनाय समानविषयकतामात्रेण प्रतिबंधकतामतेन स्यादुपयो
गादिति ध्येयं व्याख्यायामित्यर्थः इतिभावार्थः । केचित्तु गौरवे ऐतिरूपत्वावच्छेदेन वायुत्वा
भाववद्व्याप्यत्वनिश्चयेपि कदाचिदतिरिक्तसंभावनासंभवेन तादृशनिश्चयाभावविशिष्टासौ
न्नैजिकाबाध्यातथालाघवेन रूपवत्त्वावच्छेदेन तन्निश्चयरूपवद्वायुत्वाभावव्यभिचारीति ग्र
हे विरोधप्रसक्तिरितिभावइत्याहुः दीधितौ नाप्युक्तइतितथा चोक्तसंशयाद्यथानुपपत्या नसा
मान्यलक्षणेनसिद्धिस्संभवतीतिभावः सामान्याभावेतिघटादिसामान्याभावेत्यर्थः व्या
ख्यायां संनिकर्षाधीनेति सामान्यलक्षणस्वीकारइतिशेषः नैयायिकस्येति मीमांसकेन
स्सामान्यलक्षणानंगीकारादितिभावः मानाभावाद्धेतीति । अथ प्रतियोगिज्ञानस्यका
लेनेत्याकारकप्रतियोग्यमिश्रिताभावप्रत्यक्षापत्तिरेवतत्र मानं न तत्तादृशप्रत्यक्षाप्रसि
द्धेतत्तदापत्तिरितिवाच्यं । अभाववत्त्वनिर्विकल्पकस्यासिद्धान्ते नंगीकारे लेंद्रियसंबद्धविशे
षणतेंद्रियसंबद्धविशेषणविशेषणताभ्यामभावाभाववत्त्वयोर्विषयतयाभावप्रत्यक्षा

भवानं·टी०
४

पत्तेरेव तादृशापत्तिपर्यवसानादिति चेन्न । तदंगीकारेऽपि भूतले घटवत्त्वभ्रमकाल इत्यादिविशेष्य
ग्रहणशीत्ये । इन्द्रियसंबद्धविशेषणताया विशिष्टहेतुत्वस्यावश्यकतया तादृशापत्तिवारणात् न
व्यभिचार इति तज्ज्ञानं विना तत्प्रकारकज्ञानासंभवादिति भावः । नन्वेवमपि केवलाभाववत्वा
दिना तत्प्रत्यक्षे व्यभिचारो दुर्वार एवेति वाच्यं । तल्लौकिकप्रत्यक्षे तन्निष्ठइदंत्वस्य नियमेन
भानांगीकारात् । लाघवादाह ज्ञानविशेष इति दीधिताविदंत्वादिनेति । आदिना तत्त्वादिपरि
ग्रहः । इदंत्वस्य ज्ञानविशेषात्मकतया तुल्यन्यायेन तत्त्वादेरपि तद्रूपतया तद्भेदेन तत्त्वादेरिदं
त्वस्य च भिन्नत्वादिति भावः । एतेन तत्त्वादेरिदंत्वस्य चाभेदेन तत्त्वादेर्नादिपदेन परिग्रहसंभव
इति तथा सति तत्त्वादेरिदंत्वभिन्नत्वे तदुभयोर्न तेजोभाववत्त्वात्मकत्वमभेदापत्तेरिति तेजोभाववत्त्वे
नेति ग्रंथविरोधापत्तेरिति केषांचिद्दूषणं प्रावनंपरास्तं । वस्तुगत्याभेदेऽपीदंत्वस्य तेजोभाव
वत्त्वात्मकत्ववादिमते तत्त्वादेरपि तदात्मकतयाभेदांगीकारेण तन्मतदूषणप्रवृत्तस्य तेजोभा
ववत्त्वे नेति ग्रंथस्याविरोधादुपपत्तेरिति इदंत्वसंशयनिवर्तकधर्मितावच्छेदकप्रकारकता
नत्वसूचनाय व्याख्यायां तमसोऽभिन्न इति अभावे इति विशेषः । तेन तमोऽभिन्ने घटादाविदंत्वेन राम
४

भाने विवादाभावेऽपि नक्ष्यतिरिति ध्येयं । संशयायोगादिति अभावत्वधर्मितावच्छेदककाभावत्व
संशयायोगादिति भावः प्रतियोगिनिर्विकल्पकानंतरमनुभवविरुद्ध स्य घटाद्यभावप्रत्य
क्षस्यापत्तिरेवाभावप्रत्यक्षे प्रतियोगितावच्छेदकरूपेण प्रतियोगिज्ञानस्य हेतुत्वे मानं
तत्र तद्धेतुत्वेपीन्द्रियसंबद्धविशेषणतायाअभावप्रत्यक्षं प्रत्येव कार्यतावच्छेदकत्वेन तद्व
त्वाद्घट निर्विकल्पकानंतरं घटाभावप्रत्यक्षापत्तिर्दुर्वारा घटत्वरूपेण घटज्ञानं विनापि
तयापत्त्वादिरूपेण घटादिज्ञानसहकारेण घटाद्यभावप्रत्यक्षजनने घटत्वरूपेण घट
ज्ञानविरहस्याकिंचित्करत्वादित्याशंकायां तस्या अपि तत्तद्धर्मावच्छिन्नप्रतियोगिताका
भावभेदेन भिन्नहेतुताया आवश्यकतया तस्यास्तत्तद्रूपेण प्रतियोगिज्ञानसहकृतायास्त
द्धर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षोत्पादकत्वांगीकारेण प्रतियोगिज्ञानहेतुत्वे
नोक्तापत्तिरितिसमाधानमपित्वाशयेनाह मनुभवतत्वइत्यादि अभावत्वाप्रकारकस्येति प्र
तियोगितयोघटीयइत्याकारकस्येत्यर्थः घटाभावत्वादिनाघटाभावावगाहि निभ्रमरूपे

भवा.टी.
५
5

घटो नास्तीत्यादि प्रत्यक्षे व्यभिचारवारणाय घटत्वरूपेण घटज्ञानकार्यतावच्छेदके घटत्वाव
च्छिन्नप्रतियोगिताकत्वावगाहित्वस्यावश्यं निवेशनीयतया इंद्रियसंबंधविशेषणतया
अपि कार्यतावच्छेदके तस्यावश्यं निवेशनीयमन्यथा तत्रैव भ्रमे व्यभिचारेण घटत्वरूपेण घट
ज्ञानासत्त्वस्य सहकारित्वासंभवादित्याशयेनाह प्रतियोगिताकत्वावगाह्यभावप्रत्यक्षत्व
मिति। नात्रैवेति वाच्यमिति शेषः घटत्वावच्छिन्नप्रतियोगिताकेति। घटत्वावच्छिन्नप्रति
योगिताकत्वावगाहीत्यर्थः तेनोक्तभ्रमेण व्यभिचार इत्येव। इत्याद्येव। पर्यवसितमि
ति उक्तदोषाभावादिति भावः। व्यभिचार इति सामान्यलक्षणे यदेत्वादिनोक्तमाने इत्यादिः
तस्यात्र धर्मावच्छिन्नप्रतियोगिताकत्वावगाहित्वाभावेन प्रतियोगिज्ञानकार्यतावच्छेदका राम
नाक्रांतत्वादि ~~[illegible]~~ नेति भावः। तेनेति तथा च विशेष्ये विशेषणमित्यादि विषयताशालित्व ५
भावप्रत्यक्षस्यांगीकारे तद्विशिष्टवैशिष्ट्यबोधात्मके च विशेषणतावच्छेदकप्रकारकनिश्च
यस्यापेक्षितत्वेन निर्विकल्पकोत्तरमभावः प्रत्यक्षापत्त्यसंभवेन तत्र प्रतियोगिज्ञानहेतु

त्वमप्रामाणिकमेवेतिभावः। ननु प्रतियोगिज्ञानस्य स्वातंत्र्येण हेतुत्वेपि विशेषणतावच्छेदकप्रकारकविशेषण निश्चयस्य हेतुत्वानुरोधेनैव सामान्याभावभानेपावत्प्रतियोगिरूपविशेषण निश्चयार्थं सामान्यलक्षणास्वीकार आवश्यक इत्यत आह नात्वेति। तथाच विशेषणतावच्छेदकप्रकारकनिश्चयमात्रस्यैव तत्रापेक्षणेन विशेषण निश्चयस्यानावश्यकत्वयान सामान्यलक्षणासिद्धिरितिभावः। द्वितीयेतु। सामान्याभावधी विषयीभूतसकलप्रतियोगिसंनिकर्षार्थं सामान्यलक्षणांगीकारेतु अन्वयव्यतिरेकाभ्यां तज्जनकतायां विशेषणविषयकत्वे निर्देशस्यावश्यकत्वमित्याशयेनाह पूर्वोक्तेति घटत्वप्रकारकज्ञानत्वरूपेणत्यर्थः अन्वयव्यतिरेकावेवासिद्धावित्याशयेनाहाभ्युपेत्येति एतदाशयेनैव शोधितेति हेतुत्वेपीत्यभिप्रायोपादानं एवंच शोधितेऽप्रतियोगिज्ञानस्य हेतुत्वेपीत्यस्य प्रतियोगिघटादिरूपविशेषणविषयकत्वस्य विशिष्टवैशिष्ट्यबोधजनकतावच्छेदकत्वेपीत्यर्थ इतिध्येयं। केचित्तु। ननु विशिष्टवैशिष्ट्यबोधीयविलक्षणविषयतानभ्युपगमेन प्र

भवा·टी·
६
6

तियोगितावच्छेदकप्रकारकयावत्प्रतियोगिज्ञानत्वेन हेतुत्वमावश्यकं अन्यथा सामान्याभावप्रभा
नस्य यावत्प्रतियोगिविषयकत्वानुपपत्तिः संनिकर्षाभावादिति प्रागल्भाभिप्राय इत्याशं
कायां तं दूषयति दीधितौ प्रतियोगिज्ञानस्येति। विशिष्टवैशिष्ट्यबोधीयविलक्षणविष
यतानभ्युपगमेन प्रतियोगितावच्छेदकप्रकारेणोपस्थितेः तत्संभवात्। सामान्याभावप्रत्य
क्षसंभवात्। इदं चाहेतुत्वादित्यत्र हेतुः तथा च यावत्प्रतियोगिविषयकत्वमेव तस्यासिद्ध
मिति भावः। एतादृशव्याख्याने च मध्ये द्वितीयकल्पदूषणप्रयुक्तो न संदर्भविरोधः प्रति
योगिज्ञानस्येति ग्रन्थस्यापि द्वितीयकल्पीयत्वेन तद्दूषणस्य मध्यत्वाभावादित्याहुः अन्ये तु राम
प्रतियोगिज्ञानस्य स्वकाले इन्द्रियसंबद्धविशेषणतारूपसंनिकर्षसत्त्वे प्रतियोग्युपस्थितने ६
त्याकारकप्रत्यक्षस्य वारणार्थमभावप्रत्यक्षे प्रतियोगिज्ञानहेतुत्वमावश्यकं न चैवमपि तत्
स्य घटत्वाद्यवच्छिन्नप्रकारताशालिभावजन्यत्वमेव जन्यतावच्छेदकं वाच्यमन्यथा यद्
भाववत्त्वादिना घटाद्यभावप्रत्यक्षे व्यभिचारापत्तेरिति तद्धेतुत्वे युक्तापत्तिर्दुर्वारेतिवाच्यं।

इंद्रियसंबद्धविशेषणतायाअप्युक्तरीत्यैवविषयभेदेनहेतुत्वयोक्तापत्त्यसंभवात्तत्आह।दी
धितेप्रतियोगिविशेषितेति।तथाचविशिष्टवैशिष्ट्यबोधस्थलीयतत्कृत्यहेतुतयैवनि
र्वाहेतुद्धेतुत्वेमानाभावएवेतिभावः।नन्वेवमिंद्रियसंबंद्धविशेषणतायाअनंतहे
तुतापत्त्याऽगौरवेणस्वातंत्र्येणतद्धेतुत्वमेवसम्यक्नचतत्वाप्युक्तरीत्यातत्स्याअनं
तहेतुत्वमावश्यकमितिवाच्यं।मन्मतेअभाववत्तावगाहित्वेप्रतियोगितयाघटाप्रकारक
त्वेसतिघटातिरिक्तप्रकारकंयज्ज्ञानंतत्त्वाभाववत्त्वप्रकारकाभावत्वेलौकिकप्रत्यक्षत्वादेरेव
घटत्वप्रकारकघटज्ञानादिकार्यतावच्छेदकत्वेनवेत्याकारकप्रत्यक्षस्यघटपटादी
रूपयावत्प्रतियोगिज्ञानकार्यतावच्छेदकाक्रांततयाप्रतियोगिज्ञानस्यप्रकात्वेआप
त्त्यभावेनतस्याएकहेतुत्वेप्यदोषात्।अथैवमपिघटपटाभाववत्वादिनाभ्रमात्मकप
टोनास्तीत्याकारकंघटाभावप्रत्यक्षंआपद्यतेतद्घटपटोनास्तीत्याकारकघटाभावप्र
त्यक्षस्यापत्तिः।तादृशज्ञानस्यघटाप्रकारकघटातिरिक्तप्रकारकज्ञानभिन्नत्वाभावे

भ.वा.नं.टी.

७ न घटत्वप्रकारकज्ञानजन्यतावच्छेदकानाक्रान्तत्वादिति चेन्न प्रतियोगितासंसर्गावच्छिन्न
घटत्वावच्छिन्नप्रकारतातिरिक्तप्रकारत्वानिरूपिताभाववत्त्वावच्छिन्नविषयताकसम
नियताभावज्ञानाभेदेऽपि नक्षतिः उपदर्शितरीत्या कार्यकारणभावेनैव तत्र व्यभिचार
वारणसंभवात् । न चैवमपि कार्यतावच्छेदकगौरवमिति वाच्यं । इंद्रियसंबद्धविशेष
णतायाः अनंतकारणत्वाकल्पनेनैव लाघवस्यापरामृष्टत्वादिति मिश्रानुयायिनां
मतमवलंब्याह प्रतियोगिज्ञानस्य हेतुत्वेपीति । अत्रापिशब्दो स्वरसस्सूचनाय तथाहि
इंद्रियसंबद्धविशेषणतायाएकहेतुत्वे प्रतियोगिज्ञानहेतुतामतेपि घटज्ञानकालेऽभा राम
वेन घटीयइत्यसंसर्गग्रहेनेत्याकारकप्रत्यक्षापत्तिर्दुर्वारा न च घटपदादिरूपया ७
वत्प्रतियोगिज्ञानरूपकारणबाधादेवनोक्तापत्तिरिति युक्तमेवेति वाच्यं । यावत्प्रतियोगि
ज्ञानं विनापि घटो नास्तीति प्रत्यक्षोदयेनेंद्रियसंबद्धविशेषणतयाफलजननेया
वत्प्रतियोगिज्ञानस्य विशेषसामग्रीत्वासंभवेन तथापत्तिसंभवात् । यदि च घ

टज्ञानसहकृतस्याभावोनघटीयइत्यसंसर्गाग्रहादेरेवं पटज्ञानकृतस्याभावोनपटीयइत्य
संसर्गाग्रहादेश्चैकैकस्यविशेषसामग्रीत्वमभ्युपेयमोक्तापत्तिवारणंसंभवतीतिवि
भाव्यते तत्प्रतियोगिज्ञानस्यसामान्यैलहेतुत्वानभ्युपगमे चित्रस्थलेः विशेषणता
वच्छेदकप्रकारकज्ञानविधयातस्यावश्यापेक्ष्यत्वेनैवेंद्रियसंवद्धविशेषणतयाफल
जननेविशेषसामग्रीतयातस्यावेक्ष्यणसंभवात्। इत्थंचमोमते हीन्द्रियसंवद्धविशे
षणतायाविशिष्टकार्यकारणभावोनांगीक्रियतेकिंत्वभावलौकिकचाक्षुषत्वाव
वच्छिन्नं प्रत्येवघटज्ञानादेरेवविशेषसामग्रीतयासहकारित्वोपगमेनत्वदुक्तरीत्यैवने
त्याकारकप्रत्यक्षवारणसंभवात् इदंत्वप्रकारकाभावप्रत्यक्षस्यानुपगम्यादिदंत्वोपा
।स्थितेरपिविशेषसामग्रीत्वाभ्युपगमावश्यकत्वादनुपपत्तिरपि। एवंचमन्मतेपिविशिष्टवि
षयेंद्रियसंवद्धविशेषणतायाः कार्यकारणभावएवनास्तिकुतस्तत्कल्पनप्रयुक्त
लाघवंमिश्राणामितितन्मतमनुपादेयमेवेतिवदन्ति। अधिकमनुमितिलक्षणेव

प्रागभिहितं। तद्घटप्रतियोगिकेति तद्घटव्यक्तिप्रतियोगिकत्वमर्थः तद्घटज्ञानत्वेन तत्तद्व्यक्तिज्ञा
नत्वेन हेतुतेति तज्ज्ञानस्य च काले तदभावज्ञानापत्तिवारणाय यावद्रूपकमिति शेषः। दीधि
तौ भानाभावादिति एकरूपेण तज्ज्ञाने रूपान्तरावच्छिन्नतदभावप्रत्यक्षवारणाय तद्रू
पावच्छिन्नाभावप्रत्यक्षे तद्रूपप्रकारकज्ञानस्य हेतुत्वावश्यकत्वे व्यक्तिभेदेन हेतुत्वान्तरे
प्रमाणाभाव इत्याशयः। व्याख्यायां प्राचीनैरेवेति स्वमते समनियताभावैक्येन तमस्त्व
रूपे व्यभिचारो बोध्यः। यावत्तेजोज्ञानादीति तादृशोज्ञानादिः एवमग्रेपि तद्धर्मी यावत्तेजो
ज्ञानार्थं सामान्यलक्षणया। अंगीकार्येति। तथा च प्रतियोगिज्ञानहेतुतामते अंधकार
प्रत्यक्षानुरोधेन सामान्यलक्षणासिद्धिरिति भावः। स्वपरेति। अत्र चक्षुरालोकप्र
णुकादिसंबंधकारसत्ताय स्वप्रकाशकत्वमुक्तं तच्चोद्भूतरूपवन्महत्त्वं सुवर्णादिमति
तत्सत्तायुपरप्रकाशकत्वमुक्तं। तच्चुःसंयोगेन चाक्षुषजनकत्वं। तथा च लक्षय
परिशेषयत्वे आत्मविशेषावच्छिन्नसामान्याभावो अंधकार इति पर्यवसन्नं। न चात्र य

त्किंचित्संबंधेनतादृशाभावस्तेजोविशेषवत्यपिसंबंधसामान्येनतादृशाभावस्यांधका
रवत्त्वमपीतिवाच्यं।संयोगेनतादृशाभावस्यैवांधकारत्वात्।नचैवमालोकेंधकार
प्रत्ययापत्तिःस्वाश्रयसंयोगेनस्वाभावादितिवाच्यं।तत्राप्युक्तानुरोधेनतत्रापिसंयो
गेनालोकांतरसत्वस्यावश्यमभ्युपेयत्वात्।यत्तुतेजोविशेषत्वमनुगतमभिभूतरूपव
त्तेजस्त्वंतदवच्छिन्नसामान्याभावएवांधकारइतिनव्यैरुक्तंतत्तुच्छं।आलोकघण्ड
कादिसत्वेंधकारासत्वप्रसंगात्नीलमण्यादिप्रभारूपस्यनीलमण्यादिरूपाभिभ
तत्वान्नीलमण्यादिप्रभासत्वेप्यंधकारसत्वप्रसंगाच्च।अत्रेदमवधेयं।तेजोविशेष
सामान्याभाववत्वंनांधकारत्वंतथासतिरूपादावप्यंधकारप्रत्ययापत्तेः।नचचक्षुः
संयुक्तविशेषणतायाएवतद्ग्राहकत्वांगीकारान्नोक्तापत्तिरितिवाच्यं।एवमप्यनुमा
नादिनातद्ग्रहेरूपादौतद्व्यवहारस्यदुर्वारत्वात्।नचांधकारादिपदसमभिव्याहृत
सप्तम्यादेरनुयोगिकविशेषणतावच्छिन्नाधेयताबोधकत्वमस्यत्वंगीकारान्नो

भवानं·टी·

९ व्यवहार इति वाच्यं। तथा चांधकारेंधकार इति प्रतीतिव्यवहारयोरनुपपत्तेः न चेष्टापत्तिरनु
9 भवविरोधात्। अंधकारद्रव्यत्ववादिनाखंडनकारेण इष्टेद्रव्यसत्त्वेनांधकारेंधकार
सत्त्वेन तत्प्रतीतिव्यवहारयोः स्वीकाराच्च। किंच तादृशाभावत्वस्यांधकारत्वात्मकत्वें
धकारस्तेजोविशेषसामान्याभाव इति सहप्रयोगानुपपत्तिः एवं तेजोविशेषत्वानुसं
धानेप्यंधकारप्रत्ययानुपपत्तिस्तस्मात्तत्तदभावस्वरूपं विषयताविशेषेण ज्ञानविशे
षोयांधकारत्वं यत्रांधकारप्रतीतिव्यवहारौ तत्रैव तादृशांधकारत्वविशिष्टाधिकरण
त्वाभ्युपगमाच्च नानुपपत्तिः अतएव पूर्वमतएवेदंत्वादिनोपास्थित इति ग्रंथव्याख्या
नावसरे तेजोभावत्वं नेदंत्वं किंतु स्वरूपेण तत्तदभावव्यक्तित्वव्यक्ति ज्ञानविशेषो वेति व्या राम ९
ख्याप्येतादृशाशयमूलिका स्वरसतः संगच्छत इति दिक्। ननु ध्वंसप्रागभावयोरत्यं
ताभावविरोधेन ध्वंसप्रागभावाधिकरणे सामान्याभावासंभवेन कृत्यमुक्तसामा
न्याभावस्यांधकारत्वसंभव इत्यत आह ध्वंसेति प्राक्। अधिकरणधर्मावच्छिन्नाभा

वच्छिन्नप्रत्यक्षलक्षणे । दीधितौ तत्राभावसमुदाय इति । संयोगाद्यसंबंधावच्छिन्नतत्तद्व्यक्ति
त्वावच्छिन्नप्रतियोगिताकतत्तज्जोधविशेषाणां तत्तद्घटाद्यभावसमुदाय इत्यर्थः । तेन ध्वंसा
देः प्रतियोगितावच्छेदकसंबंधानंगीकारेपि न क्षतिः आख्यायां प्रागभावध्वंसयोरि
ति अत्राप्रचयनाशाजन्यध्वंसस्याप्यत्रसंभवोपि संभवति न तु प्रागभावस्येति प्राग
भावस्याभ्यर्हितत्वमित्याशयेन प्रागभावस्य पूर्वनिपातः यत्र यावद्धिरिति । तथा च
अधिकरणे तत्तज्जन्यध्वंसप्रागभावयोरेकप्रकार पदार्थानंतर्भावेनाप्यत्रासंभवेपि
न क्षतिरित्याशयः कुत्र किं यद्धिस्तत्तज्जोभावेस्तम्योव्यवहार इत्यस्य निर्देष्टुमशक्यत्वा
दाह किंचेति । तथा चेति तथा चाभावेयावत्वानि देशे न अधिकरणे तत्तत्सां ध्वंसप्रा
गभावयोरप्यत्रासंभवेपि न क्षतिरिति भावः दीधितौ अनेन गमादिति नानात्वादनु
गत धर्माभावाद्वेत्यर्थः आख्यायां यावदभावेति तत्सामान्याभाव प्रत्यक्षपूर्वं नि
यमन तत्तद्विशेषाभावकूटेपि संनिकर्षसत्वादिति भावः अशक्यत्वादिति सामान्य

लक्ष्यत्वव्यापीत्यादिः तथा चांधकारस्यासर्वज्ञाप्रत्येयत्वापत्तिरितिभावः तदधिकरणत्व
प्तितेजस्त्वादिनेति आदिनात्तदधिकरणव्याप्तितेजस्त्वपरिग्रहः तेजस्त्वस्य अधिक
रणतेजःसाधारण्येन ध्वंसप्रागभावप्रतियोगितापत्तिप्रसक्तं तथा तदनतिप्रसक्तं ध
र्ममाह तत्कालावच्छेदेनेति ध्वंसप्रागभावकालावच्छेदेनेत्यर्थः अधिकरणतेजोनि
ष्ठतदधिकरणवृत्तित्वस्य तत्कालानवच्छिन्नतया नैतस्यातिप्रसक्तत्वमिति भावः। तत्तत्प्र
तियोगितावच्छेदकावच्छिन्नेति। अत्रावच्छेदकत्वद्वयं स्वरूपसंबंधरूपं वोध्यं तेन ते
जस्त्वादेरन्यूनवृत्तित्वादिरूपावच्छेदकत्वेपि न क्षतिः। रूपमिति तेजस्त्वादेस्तादृशप्रा
गभावादिप्रतियोगितावच्छेदकत्वाभावादिति भावः। अत्यंताभावइति अन्येनतेनै राम
वकारोत्र संबध्यते तथाभावात्। तत्तत्प्रतियोगितावच्छेदकावच्छिन्नाभावप्रसक्त्यस्तु १०
स्यकार्यतावच्छेदकत्वात्। अतएव। अत्यंताभावएव। तथाभावादेव। घटत्वावच्छे
नैव घटत्वावच्छिन्नप्रकारताकत्वेनैव तथात्वं यथा घटध्वंसप्रागभावादीनां घटत्वा

घाश्रयप्रतियोगिकत्वेन प्रत्यक्षं तथांधकारघटकृतेजोध्वंसप्रागभावयोरपि तेजस्त्वा
श्रयप्रतियोगिकत्वेन प्रत्यक्षसंभवान्नानुपपत्तिरिति भावः अनावश्यकत्वादिति
तथा च तेजोभावकूटेंधकारप्रतीतिविषयत्वं न संभवतीति भावः मास्त्विति अ
नेन सामान्याभावे भानानुरोधेन सामान्यलक्षणया अनावश्यकत्वेपीति सू
चितं। अन्यथा सामान्यलक्षणां विना। मदुक्तदिशा। अस्मं ताभावेंद्रियसंबंद्धवि
शेषणतायाएवेत्युक्तरीत्या दीधितेर्न प्रतियोगिज्ञानमिति रत्नं च वस्तुगतिमनुरु
ध्योक्तं। वस्तुतस्तु प्रतियोगिज्ञानापेक्षायोपि न क्षतिः अनागतानामप्यनुमाना
ज्ञानसंभवस्य स्वरूपमेव वस्तुतास्त्विष्यादिना सामान्यलक्षणाशेषे वक्ष्यमा
णत्वादिति ध्येयं। आरव्यायां संनिकर्षार्थमेव सामान्यलक्षणेति। न च सामा
न्यलक्षणया एव संनिकर्षत्वे कथं संनिकर्षार्थत्वोक्तिरिति वाच्यं। तदिंद्रियक
रणकतद्धर्मवत्त्वबोधसामग्रीसापेक्षपायरवतस्याः संनिकर्षत्वेन प्रकृते तादृशा

सामग्र्यभावेन तस्याः स्वतः संनिकर्षत्वासंभवेन तथोक्तेः। इदं। घटमुख्यविशेष्यकं घटो
भविष्यतीत्याकारकं। उपनीतविशिष्यकेति उपनीतमुख्यविशेष्यके इत्यर्थः। मनसेति
इदं प्रत्यक्षमित्यनुव्यवसाये व्यंजकत्वेति न चेत्यादिनेत्यादिः विरोधादित्यलौकिकप्र
त्यक्षस्य स्वसामग्र्या व्यंजकत्वेन बहिर्विषयकस्य तस्यालौकिकतया तत्र सामग्र्या
व्यंजकत्वविचारासंभवादिति भावः घटविशेषणकेति घटेन भविष्यतइत्याकार
कमित्यादि। अनेन घटो भविष्यतीत्यनेन। ननु भविष्यत्ताविशेष्यकप्रत्यक्षं सामग्र्या
व्यंजकत्वोपवर्णनाद्विरोधाय भविष्यत्तांशे लौकिकमेव वाच्यं तच्च न संभवति
भविष्यत्ताया वर्त्तमानप्रागभावप्रतियोगित्वरूपतया तदानीं प्रतियोगिनोऽसत्वे राम
न तदंशे लौकिकसंनिकर्षासंभवादत आह ध्येयमिति निरूपकतासंबंधावच्छिन्ना ११
नुयोगित्वस्यैव प्रतियोगित्वरूपातयानोक्तदोषः। न चाविनिगमनाविरहः उक्तप्र
त्यक्षान्यथानुपपत्तेरेव विनिगमकत्वादित्याशयः अवगाहंताभासंतादीधितेरप्र

मत्त्वमिति। तादृशप्रत्यक्षस्येत्यादिः स्यादितिशेषः तथा च तादृशप्रमात्मकप्रत्यक्षस्यानुरोधे
न सामान्यलक्षणासिद्धिरिति हृदयं। अनागतप्रतियोगिकत्वमेवास्तामत आ
ह नन्वेवेति। प्रत्यासत्त्यंतरं सामान्यलक्षणाजन्यज्ञानप्रत्यासत्तिभिन्नं अस्त्वितियेन
तत्साक्षात्कारः स्यादितिशेषः सामान्यप्रत्यासत्त्या घटत्वेनेति आद्यतृतीयार्थो
ऽभेदे ते घटत्वान्वयी द्वितीयतृतीयार्थोऽजन्यत्वमनुभूतपदार्थैकदेशानुभवान्वयी
अनुभूतत्वं तदिंद्रियकरणकतद्धर्मवत्त्वबोधसामग्रीकाले प्रागनुभूतत्वं। तादृशा
नुभवस्य प्रागभावप्रत्यक्षापर्यंतमसत्त्वादाह स्मृतत्वं चेति। व्याख्यायां हेतुत्वा
भिप्रायेणेति। सामान्यप्रत्यासत्त्यनंगीकर्तृमते तद्धेतुत्वाभावादिति भावः ननु
सामान्यलक्षणायैवानागतघटभानं न संभवति तदानीं तदिंद्रियकरणक
तद्धर्मवत्त्वबोधसामग्र्या असत्त्वात् अत एवाग्रे त्वस्या वतरणे ज्ञानरूपसं
निकर्षार्थमेव सामान्यलक्षणेत्युक्तमत आह ध्येयमिति। अयमाशयः द्वेपि

भवा·टीप
१२ दर्शितरीत्यातद्धर्माश्रयमुख्यविशेष्यकत्वाद्युष्यएवतत्रद्धर्माश्रयत्लौकिकचाक्षुषसा
12 मग्र्या अपेक्ष्यत्वेन तां विनापि साध्याभावस्य तत्यस्य घटविशेषणकप्रागभावप्रत्य
क्षासंभवत्वेव अवतारत्वे संनिकर्षार्थमेवेसुक्तिस्तुयथाश्रुते घटो भविष्यतीति घ
टमुख्यविशेष्यकप्रत्यक्षाभिप्रायेणेति। नपूर्वापरविरोधइति प्रागभावप्रत्यक्ष
स्यैवाभावान्नतदनुरोधेनसामान्यलक्षणे ऽस्याशयेनाशंकते दीधितौ नन्वेति। वा
स्यमित्यग्रिमेणान्वयः चरमकारणरूपेति। विजातीयकपालद्वयसंयोगादिरूपे
त्यर्थः सामग्रीसंयः सामग्रीजन्यलौकिकसाक्षात्कारविषयः वाऽऽइतित्वयेत्यादिः राम
व्याख्यायां प्रागभावव्याप्यत्वेनेति व्याप्तिश्च यत्रयत्स्मिण्णवछेदेन घटादिचरमका १२
रणं तत्रतस्यणावछेदेन घटादिप्रागभावइत्याकारिकेति ध्येयं। दीधितौ प्रागभाव
स्यानुमितिरेवेति एवकारेणप्रत्यक्षव्यवछेदः अनुमितिस्वरूपात्वे घटप्रागभा
वस्यघटे प्रागभावप्रतियोगित्वस्यवा अनुमितौच पक्षधर्मतावलादपूर्वस्यभानेऽपि

भानमितिनतदनुरोधेन सामान्यलक्षणेति भावः। व्याख्यायामनियताधिकरणेतिपाठे
इतीयंतस्य प्रतियोगिन्यन्वयः। नियताधिकरणेतिपाठे तु इहेत्यस्यान्वये स्यादिः
प्रत्यक्षानुपपत्त्यादिसत्त्वप्रत्यक्षानुदयप्रसंगादित्यर्थो बोध्यः बलवत्वादिति
नचानुमित्यन्यूनविषयकलौकिकप्रत्यक्षसामग्र्या एव बलवत्वेन प्रकृते प्रति
योग्यंशे लौकिकप्रत्यक्षसामग्र्यभावात्कथं बलवत्त्वमिति वाच्यं। तथापि स
त्त्वांशे प्रागभावलौकिकप्रत्यक्षे कार्ये तत्प्रत्यक्षसंभवे तदनुरोधेन सामान्य
लक्षणया आवश्यकत्वमित्यत्र तात्पर्यात्। असत्त्वेनेतीति। घटादिकार्ये प्र
तिबन्धके चरमकारणप्रत्यक्षे तत्तत्र व्याप्तिस्मरणं ततः पक्षधर्मताज्ञानमिति
न तदानीं प्रागभावस्यासत्त्वमिति भावः। लौकिकेत्यप्रत्यक्षायोगादिति। लौकिक
प्रत्यक्षे विषयस्यापि हेतुत्वादिति भावः। ननु प्रागभावकालेऽप्युपनीतभानात्म
कज्ञाने ग्रहसंभवेन कथं तावत्कालं प्रागभावस्यासत्त्वेन प्रत्यक्षायोग इति चे

त्र। चरमकारणांशेऽपनीतभानात्मकव्याप्यत्वग्रहस्य सर्वदासंभवेन सर्वदैव प्रागभा-
वप्रत्यक्षापत्तिवारणाय चरमकारणांशे लौकिकविषयताशालिव्याप्यत्वग्रहकाल
एव प्रागभावनाशात्। तच्च चरमकारणांशेऽनुपनीतभानात्मकव्याप्यत्वग्रहस्य हेतु-
त्वेपि सर्वदा प्रागभावप्रत्यक्षापत्तिवारणं चरमकारणस्याभिव्यंजकत्वांगीकारेण
विषयस्य कार्यसहभावेनैव हेतुत्वे च व्यक्तिकालसत्त्वरूपव्यंजकत्वांगीकारेण संभ-
वति। तथा च तादृशानुमितिसामग्रीकाले समानविषयकप्रत्यक्षसामग्र्या अपि स-
त्वात्कथं तदा प्रागभावानुमितिरपीति वाच्यं। प्रागभावस्यानुमितिस्वीकर्त्रा प्रागभा- राम
वस्य योग्यतया लौकिकप्रत्यक्षास्वीकारेण तत्सामग्र्याः प्रतिबंधकत्वास्वीकारात्। ९३
कारणायांज्ञानस्य कपालादौ ज्ञानस्य। तेन नियताधिकरणकप्रत्यक्षोपपत्तिः ननु का-
र्योपधानव्याप्यत्वग्रहपर्यंतं प्रागभावस्यासत्त्वेन तत्प्रत्यक्षायोग्यत्वेऽपि तत आह
तत्तत्कार्येति। अथैवं चरमकारणांशे तादृशकार्योपधानव्याप्यत्वज्ञानमुपनीतभा-

नात्मकमेवसंभवतीति तस्यैव व्यंजकत्वे स्वीकरणीयं तथा च सर्वदा तादृशज्ञानसंभवेन सर्वदैव
प्रागभावप्रत्यक्षापत्तिरिति चेन्न तादृशसामग्र्या अपि उक्तदिशा व्यंजकत्वात् । न चैवं कि
तादृशज्ञानस्य हेतुत्वे नेति वाच्यं । तथाविधाव्याप्यत्वज्ञानकाले फलानुत्पादानुरोधे
न तादृशज्ञानस्य हेतुत्वावश्यकत्वात् । तन्नेति कार्योपधानव्याप्यत्वेन ज्ञाने चेत्यर्थः । अ
तेन प्रागभावस्यासत्त्वेनेति प्रागुक्तं समाहितं । नेति तत्प्रत्यक्षासंभवस्येतनाच्च
यि । न चाकार्योव्याप्यरूपभिन्नविषयकानुमितिसामग्र्याः सत्त्वात्कथं प्रागभावप्रत्यक्ष
मिति वाच्यं । ज्ञानद्वयसाधारणस्यैकरूपेणाव्याप्तिपक्षधर्मतयोर्ज्ञानस्य व्यंजकतया
तादृशज्ञानद्वयकाल एव भिन्नविषयकानुमितिसामग्र्या असत्त्वात् । भाव्यास्तु एतद
स्वरसादेवोक्तं कार्योत्पादे हेतुरिति प्रत्यक्षे छायासन्निविष्टित इत्यर्थः । कार्य्यस्तु न विवक्षितः
तथा च तत्प्रत्यक्षस्थले प्रागभावप्रत्यक्षेणानुपपत्तिरिति भावः इत्याहुः । विनिगमने
ति लाघवादिरूपविनिगमनेत्यर्थः । तथा च गुरुशरीरत्वघटितकार्योपधानव्याप्य

भवा॰टी॰ १४

15

त्वज्ञानस्यव्यंजकत्वेलाघवविरहादुत्पत्त्यघटितप्रागभावमेयोत्वज्ञानस्यव्यंजकत्वेलाघ
वेनतदेवव्यंजकमित्यस्यरतात्पर्याभ्यांविनिगमनेस्यादित्यंतार्थः यथाश्रुतेवि
निगमनाविरहादुभयसिद्धेप्रागभावव्याप्यत्वज्ञानमेवेत्यस्यासंगतेः वस्तुतस्तुएव
कारस्याव्यर्थकत्वायायथाश्रुतमेवसम्यक् ।नन्वेवमपिप्रागभावलौकिकप्रत्यक्षेबाधका
भावः कार्योपधानव्याप्यत्वस्यैवग्रिचतुःस्थैत्यं नभावेत्प्रागभावव्याप्यत्वस्यापिप्राग
भावकालेज्ञानसंभवादत आह ।एवंचेति ।प्रत्यक्षस्याभ्युपगमेलौकिकप्रत्यक्षस्याभ्युपगमे
संनिकर्षस्यलौकिकसंनिकर्षस्यकारणत्वेनितलौकिकप्रत्यक्षेविषयसंनिकर्षयोः का
रणत्वस्यक्लृप्तत्वादितिभावः गौरवादितितथाचप्रागभावस्यायोग्यत्वेनलौकिकप्र राम १४
त्यक्षासंभवइत्याशयं अनुमितिरेवेतितयैवतद्व्यवहारसंभवादितिभावः आदिना
विनाश्यभावत्वरूपप्रागभावत्वपरिग्रहेविनाशत्वस्यप्रागभावप्रतियोग्यभावत्व
रूपतयान्योन्याश्रयइत्यत आह आदिनेतिमतभेदेन ।नव्यमतेनप्राचीनमतानुसा

रेणाह यद्वेति। प्रागभावप्रतियोगित्वस्येति प्रथमकल्पे प्रागभावनिष्ठघटप्रतियोगिकत्वस्ये
त्यर्थः घटविशेष्यकानुमानकल्पे पर्याप्तमेवेति ध्येयं।। दीधितावनुमानासंभवाद्वेति
तथा चोपदर्शितगौरवस्य प्रामाणिकतया प्रागभावप्रत्यक्षे न बाधकाभाव इति भावः। ननु
घटो भविष्यतीति प्रत्यक्षस्यमित्यादिना प्रत्यक्षप्रतीतिमुपक्रम्य पूर्वपक्षे भविष्यत्वं ही
त्यादिना वर्त्तमानशाब्दबोधप्रक्रियोपदर्शितं समाधानमनुपपन्नमतस्तदाशयमा
ह। व्याख्यायां नचेत्यादिना घटो नास्तीत्याकारकमिति प्रागभावप्रत्यक्षमित्यनेना
न्वयः अतीते वर्तमाने च भविष्यत्वप्रतीत्यापत्तेराह दीधितौ वर्त्तमानेति प्रागभावविं
शेषणं वर्त्तमानत्वं च तत्तच्छब्दप्रयोगाधिकरणतत्क्षणरूपकालवृत्तित्वं। समानार्थ
कत्वात् तत्त्वेनानुभवात्। ननु कथमिति मत एव प्रागभावप्रतियोगितयोत्पत्तेरुत्पत्तिमत्ता
भावेन प्रागभावप्रतियोगित्वासंभवाद्वर्त्तमानप्रागभावप्रतियोगुत्पत्तिकत्वमित्य
संगतमतः प्रतीकमध्ये त्वेवं तदाशयमाह व्याख्यायां उत्पत्तेरिति क्रियात्मकतयेति प्रथ

भवा॰टी॰
१५
15

ण संबंधस्य क्रियात्मकस्य लक्षणत्वादिति भावः तत्प्रागभावःऽस्यन्निप्रागभावः प्रामाणि
क इति तथा चोत्पन्नेरप्युत्पन्निमत्वमिष्टमेवेति भावः अस्वीकारात्। सामान्यलक्षणप्रत्या
संगतिकर्त्तुभिरित्यादि। इदं भविष्यत्वमिति। इदमिति प्रतीकं भविष्यत्वमिति पूरणं दी
धिना बोध्यम्। अमिति लौकिकप्रत्यक्षाविषयः नचोक्तभविष्यत्वस्य लौकिकप्रत्यक्षाविष
यत्वाभावेनुमित्यादिविषयत्वमेव वाच्यं। तच्चतादृशेणानुमानायोगाद्व्रेत्यनेन दूषि
तमेवेति वाच्यं। अत्रापत्त्या प्रमेयं प्रमेयवदित्यादिघटमितिमूलकप्रमुख प्रमेयत्वादि
क् स्मरत्वेन तदनुमानसंभवइत्याशयात्। अत एवास्य लौकिकप्रत्यक्षासंभवेप्यलौ
किकमानसप्रत्यक्षसंभवेन तत्रानागतघटादिभानानुरोधेन सामान्यलक्षणावश्यकी राम
स्यपि परास्तं। ऽतः दिशा सामान्यलक्षणां विनैव तदुपपत्तेः अतीन्द्रियत्वादित्ति। नचैव १५
मुक्तभाविष्यत्वस्याप्यतीन्द्रियकालादिघटितत्वेन तत्त्वंऽनमनुपपुक्तमिति वाच्यं। वस्तु
गतिमनुरुध्य तत्त्वंऽनात्। कपालसंयोगनाशजन्यघटनाशस्यत्वेद्दह कपाले घटध्वंसो

भविष्यतीति प्रतीत्या विशेषाप्तिरत आह। कपालनाशजन्येति। बुद्धिः बुद्धिमूलकप्रयोगः एव
मत्रेपि। न वा भवनेष्व इति। न चात्र भवने घसमुत्पन्नघप्रागभावोऽस्य योगमिष्यतीति मैत्रे प्राग
भावो ध्वंसो भविष्यतीति प्रयोगापत्तिरेव कृतेति वाच्यं। तत्रस्ते ध्वंसनीसंज्ञाया लुटो विषय
त्वेन तथा लटो बाधो न तादृशप्रयोगापत्त्यसंभवात् व्याख्यायां नाशप्रागभावेति। य
द्यपि भविष्यत्वस्य उत्पत्तिघटितं न तथा नाशोत्पत्तिप्रागभावेति वक्तुमुचितं तथापि सम
ते ध्वंसेन नाशप्रागभावस्यैव नाशोत्पत्तिप्रागभावरूपतया तथोक्तं गच्छतीति गतेर्वे
ति वर्तमानादिभिन्नस्यापि गतस्य श्वः परदिन तया परश्वः पदार्थत्वादिति भावः वर्तमाने
त्यादि। उत्पन्नेरित्यादिः अनन्वय इति उत्पन्नेरुत्पन्निमत्वाभावेन बाधादिति भावः अ
भिहितत्वादिति सत्य ह्यपि इति कारिकाया मन्तरस प्रस्पंद मधीक भूरित्यत्र प्रस्यंदः अ
संवरुद्ध संबंधोपहिता क्रिया उत्पत्तिरिति यावत् तदेव माध्वीकर्तृ तस्य भूरुत्पत्तिस्यान भि
तिश्चंद्रेण प्रस्यंद पदस्योत्पत्त्यर्थकतया भूपदस्योत्पत्तिस्या नार्थकतया च व्याख्याने नोत्पत्ते

मवा.टी०
१९
16

दप्युत्पत्तिमत्त्वमभिहितमित्यभिमानः वस्तुतस्तु तत्र प्रस्पंदपदस्योत्पत्त्यर्थकस्यापि दूरमिति
तदुत्तिन्यायेनोत्पद्यमानपरत्वमेव अन्यथाभाधीकपदेन चोत्कर्षेणाविषयत्वं दर्शयते
त्यादित्यत्रत्यागिमग्रंथविरोधापत्तेः । न ह्यनेनोत्पद्यमानमोक्षेऽत्कर्षेणाविषयस्वप्रति
पादनादिति कुसुमांजलिप्रकाशोऽप्यन्नेरप्युत्पत्तिमत्त्वमनभिहितमेवेति ध्येयं । इदमुप
लक्षणं ऽप्यनेराघ्रप्यणसंबंधरूपायाइत्यादि पूर्वोपदर्शितयुक्तिसद्भावाद्वृत्त्यपि द्रष्टव्यं ।
तादृशोत्पत्तिमत्त्वस्य । वर्त्तमानप्रागभावप्रतियोगपु । त्पत्तिकोत्पत्तिमत्वस्य । तेनाभिमेतेप्रत्याप्य
तदुत्तिलक्षणपेत्तिशेषः अत्र भूसत्तायामिति शाद्विकसूत्रति वलेनलाघवेन च भूधातोः
कालसंबंधित्वरूपसत्तायामेव शक्तिर्न तु सत्तावित्याशयेनोच्यत इति विहाय प्रत्याख्यात राम
इत्युक्तं । केचित्तु भूधातोर्लाघवेनाभेद एव शक्तिः आकाशं द्रव्यं भवतीत्यादावेव तच्चमुरक्षः १९
प्रयोगः । न चाभेदे भेदत्वावच्छिन्नप्रतियोगिताकाभावः स चाप्रसिद्ध इति वाच्यं । एव
कारवद्भेदेऽभाववद्धयंतद्धर्म इत्युपगमात्समभिव्याहारविशेषात्तत्तद्भेदत्वावच्छिन्नप्र

त्तियोगिताकाभाववत्त्वाभ इत्याद्युक्तसत उक्तशब्दे कस्मात्ति विरोधात् आकाशस्वं भवती
त्यादावभेदस्य संसर्गमर्यादया वत्त्वाभसंभवात्। धात्वर्थे निष्ठमिति इदं च धात्वर्थे त
दन्वयप्रदर्शनाय। प्रागभावानङ्गीकाराद्वाह तादृशकालीनत्वमिति व्याख्यायां एवं इ
हाघघटो भविष्यतीत्यादौ धात्वर्थे देशविशेषकालविशेषयोरधिकरणत्वेनान्वये नंक्ष्य
तीत्यादौ। नंक्ष्यतीत्यादावपि अन्वये अधिकरणत्वेनान्वये। ननु भविष्यतीत्यादावेव नं
क्ष्यतीत्यादावपि उत्पत्तिर्न प्रत्ययार्थ इत्यत आह अत्रेति। नंक्ष्यतीत्यादावित्यर्थः। एवमत्रे
पि केचित्तु नंक्ष्यतीत्यादौ प्रत्ययार्थोत्पत्तौ कालविशेषादेरधिकरणत्वेनान्वये सर्व
त्र कारककृविभक्त्यर्थस्य धात्वर्थ एवान्वय इति व्युत्पत्तिभंगापत्तिरित्युत्पत्तेर्धात्वर्थ
त्वमङ्गीकृत्य तत्रैव कालविशेषादेरन्वय उचित इत्याहुस्तन्मतं निराकरोति नत्वत्रे
ति। प्रत्ययार्थेति। आख्यातत्वेनाख्यातार्थे स्वार्थः प्रतियोगित्वे। प्रथमांतार्थघटा
घटवित्तप्रतियोगित्वे अन्वयापातादिति धात्वर्थनाशोत्पत्तेरित्यादिः। स च बाधित इति

भावः अनन्वयापात्तादिति पाठे वाधेनेत्यादिः । नचैवमुक्तमुत्पत्तिभंगो दुर्वार इति वाच्यं । अ
गत्या तत्संकोचकल्पनात् । भूतले घट इत्यादौ व्यभिचारेण तादृशव्युत्पत्तेरसिद्धेश्च
। एतेन नशधातोरेवोत्पत्तिसत्त्वांशे लक्षणया तदेकदेशो सद्भावनागतत्वादेः प्रत्यया
र्थस्य कालविशेषाद्यधिकरणत्वस्य चान्वय इत्यपि निरस्तं । पदार्थः पदार्थेनान्वेतीति
व्युत्पत्तिभंगापत्तेः केचित्तु नशधातुनैव शक्त्या लक्षणया वा नाशोत्पत्तीयुगपदेवबोध्ये
ते युगपद्वृत्तिद्वयविरोधस्य मणिकारादिभिरेवानभ्युपगमादित्याहुः तन्न द्व्यसद्धा
त्वर्थयोः परस्परान्वयस्यान्यस्य कल्पनापत्तेः प्रत्ययार्थेऽन्वयानापत्तेश्चेति । अत्रेदं द्रष्टव्यं
अत्रोत्पत्तेः प्रत्ययार्थत्वाभिधानं चरमनाशत्वमनुयोगिताविशेषो अखंडोपाधिर्वा तादृशि
ष्ट एव नशधातोः शक्तिरित्यभिप्रायेण नशधातोरुत्पत्तिमद्भावत्वविशिष्टशक्तौ
वा नागतत्वादिकमेव प्रत्ययार्थः स च धात्वर्थोत्पत्तावेवान्वेतीति न त्वेकं तादृशोत्पत्तेः का
पि न प्रत्ययार्थ इति चेन्न प्रतिपद्घट एव विनष्टश्चेत्यस्य दर्शो लक्षणयेत्यत्र कृतो प्रतिय

इति चैत्रः करिष्यतीतिप्रयोगवारणाय तादृशस्थले एवं तादृशोत्पत्तेः प्रत्ययार्थत्वस्यावश्यक
त्वादिति। दीधितौ कालविशेषादिरित्यादिना देशविशेषपरिग्रहः तेन भवने सम्
स्य घृ प्रांगणे घटो गमिष्यति प्रागभावनाशात्मक घटे प्रांगणे घट प्रागभावो नंक्ष्य
तीति न प्रयोगः प्रागभावानंगीकारे तु एकदेशोत्पत्तिकनाशस्य तद्देशावृत्तित्वा
भावादुत्पन्नो नाशो वा देशविशेषस्यान्वये पि नंक्ष्यतीति इत्याशयेनैवाह यदीपाद्य
नं। नष्टो न नंक्ष्यतीति। अत्र वार्त्तिककारानुयायिनः घटो नंक्ष्यतीत्यादौ घटध्वंसो लडर्थ
वर्त्तमानकालावच्छेदेनैव नाशप्रतियोगित्वान्वयाभ्युपगमेन नष्टे च वर्त्तमानका
लावच्छेदेन नाशप्रतियोगित्वाभावान्न नष्टे नंक्ष्यतीति व्यवहारापत्तिः एवं च नंक्ष्य
तीत्यत्र वर्त्तमानोत्पत्तेर्लडर्थत्वाभिधानं दीधितिकारोक्तमसंगतमेवेत्याहुः। तच्चिं
त्यं। अवच्छेद्याधिकरणस्य संबंधस्यावच्छेदकत्वाभावेन वर्त्तमानकालावच्छेदेन ना
शप्रतियोगित्वान्वयाभ्युपगमासंभवत्याशयेन दीधितिकारोक्तेः संगतेः। व्याख्या

भवा॰टी॰ १८ यां तस्य। धात्वर्थस्य। अभेदान्वयानुरोधाच्चेति। वस्त्वर्थे कृतिरूपेति घटमस्त्यादि प्रथम प्र
त्र। कृतौ हि रूपात्तयोः भूधातोरिति इत्यादि घटो भविष्यतीत्यादावपीत्यादिः सन्नेवेति
18 एवकारोऽन्येषां सत्त्वेऽर्थविच्छेदः प्रयोगः स्यादिति। तथा च सर्वत्र भूधातोरुत्पत्तिरेवार्थः
अनुशासनस्य सत्तापदमप्युत्पत्तिपरमेवेति भावः। प्रत्ययार्थः भविष्यत्त्वस्य यार्थः
लड्प्रत्ययार्थ चेति आख्यातस्येत्यादिः ननु एवं देशविशेषकालविशेषयोर्धात्वर्थे स्व
रूपसत्तायामन्वये भवनेऽध्वंसप्रसङ्गघटेति प्रागुपदर्शितदोषो दुर्वार इत्यत आह।
इदं चेति। प्रागभाव इति तेन भवनेऽवयवत्वादि दोषवारणं प्रतियोगिनि स्वरूपसत्ता
त्मक प्रतियोगिनि। अनेन प्रागुपदर्शितस्यध्वंसभाविनीत्यादि दोषस्य कृपात्वनाशे राम
त्यादि दोषस्य च वारणं। तथा च। एतद्देशावच्छिन्नकालाधिकरणिका या एतद्देशाव १८
च्छिन्नकालाधिकरणकवर्तमानप्रागभावप्रतियोगिनी स्वरूपसत्ता तदाश्रयो घ
ट इत्याद्यन्वयबोधः अन्वयसंभवप्रयोगादिति बहुव्रीहिगर्भकर्मधारयः तादृश

प्रयोगेऽभयत्रान्वयसंभवादित्यर्थः ऽभयत्रान्वये मैवं तादृशप्रयोगसंभवादितियावत्
नाशात्तत्प्रतियोगिनोरिति नाशोन्वयाज्जनेति नं स्यतीत्यादिर्न प्रयोगः न प्रतियोगि
न्यन्वयेन ध्वंसाभावविनाशके घटध्वंसं नंक्ष्यतीति न प्रतियोगः। तथा चाद्यतनकाल
वृत्तिरद्यतनकालवृत्तिभविष्यन्नाशप्रतियोगी घट इत्यन्वयबोधः अन्वया
संभवादिति तथा च भविष्यतीत्यादावुत्पादकत्वं भूधातोरुत्पादकमितिभावः
नन्वेवं भूधातोरुत्पादकत्वे भूसत्तायामित्यनुशासनविरोधो दुर्वार इत्य
त आह भूधातोश्चेति। सत्तामात्रेति तथा चाकार्थं भवतीत्यादौ सत्तारूपा
र्थसंभवेन न तत्परोक्तानुशासनविरोध इतिभावः आनुभविकत्वादिति। इद
मुपलक्षणं उत्पादकत्वं विनोत्करीत्याऽनिर्वाहाच्चेत्यपि द्रष्टव्यं। भूधातो
रुत्पादकत्वेनानार्थत्वापत्तिरनुशासनविरोधितादवस्थ्यं चेत्यत आह। त
त्र चेति। अन्यदेतदिति। तथा च भूधातोर्लक्षणया सत्तार्थकत्वेन न नानार्थत्वं म

वामुख्यार्थपरानुशासनविरोधश्चेतिभावः। अत्रचध्वान्तनेतीति। इदमुपलक्षणं
अतएवाह प्रस्ताप्यतइतीत्यपिद्रष्टव्यं। ननुकथमितइत्याशयः स्वरूपसंबन्धायाऽन्य
त्वसंभवमाशंक्याह स्वरूपात्मिकायामिति व्यवस्थापितत्वादितिवृत्तित्वस्य सं
प्रत्यर्थत्वेशरादिष्वपृथ्वेतिचंपकादावपि प्रसज्येतेतिभावः ऽद्यमिति अद्यतन
कालोत्पत्तिकोयोवर्तमानप्रागभावप्रतियोगीनाशस्तत्प्रतियोगीत्यादिरन्व
यबोधइतिभावः नकल्पनीयइतितत्कल्पनेविनैवोपपत्तेरितिभावः अनाप
त्येति अन्यथानष्टेनश्यतीत्यपिप्रसज्येतेतिभावः पूर्वोक्तेति। चिरविनष्टेपीत्यादि
नाप्रागुपदर्शितेत्यर्थः आद्यंतु। इतिइहाघघटोभविष्यतीत्यादौ द्विधोत्पत्तिभा राम
नस्यानुभवविरुद्धत्वमित्यस्वरसोबोध्यः प्रागभावप्रत्यक्षमितितथाचतदनु १९
रोधेनसामान्यतत्प्रत्यक्षवरूपकीर्तिभावः रीधितेसामयिकमितिसम्यग्वि
शेषायाप्रि त्रवृत्तिकमित्यर्थः मारव्यायांपूर्वमेवप्रगल्भमतरवंडनावसरएव।न

चेदमपि भाविघटविषयकेदानीमतद्घटो नास्तीत्याकारकात्यंताभावभानार्थं सामान्यलक्षणाव
श्यकत्वे चेति वाच्यं। तद्घटकत्वस्य सामान्यलक्षणयापि दुर्ज्ञेयत्वेन ताद्दशभानासिद्धेः तत्र इदं कथा
न्ते एवमग्रेपि। दीधितावभावमात्रमिति। मात्रपदेन घटत्वावच्छिन्नप्रतियोगिताकत्वव्यवच्छेदः
अप्यताद्दशप्रत्ययस्य घटप्रतियोगिकाभावमात्रावगाहित्वेपि न सामान्यलक्षणसिद्धिः तस्या
ज्ञातपूर्वघटप्रतियोगिकाभावावगाहितयैवोपपत्तेरिति निरुक्तावगाहित्वखंडनमयुक्तमिति
चेन्न। ताद्दशप्रत्ययस्य वस्तुगत्याभावव्यक्तीनां घटप्रतियोगिप्रागभावध्वंसावगाहितया सा
मान्यलक्षणावश्यकीत्यभिमानेनैव निरुक्तावगाहित्वखंडनात्। व्याख्यायां घटत्वावच्छि
न्नप्रतियोगिताकमिति। इदं च प्रतीकं। अन्वय इति अनुषंगेणान्वयः अनन्यगतिकत्वादिति
सामान्याभावावगाहिताद्दशप्रत्ययानुरोधेन प्रागभावध्वंसयोः प्रतियोगितायाअपि घट
सामान्ये स्वीकारादिति भावः। दीधितौ संबंधेन तो वेति लभ्यत्यनुषज्यते। तत्र कपाल इति न चेत्य
नुषज्यते। ततः इदानीं तत्र कपाला। व्याख्यायां। चरमघटेति महाप्रलय इत्यादिः अत्र इदानीं

नकपाले॰ प्रागभावस्य। घटप्रागभावस्य। सामान्याभावता घटसामान्याभावता। एवमग्रेपि
। सर्वाघकालेति संसारस्यानादित्वादितिभाव॰ ध्येयमिति एतन्नत्वंसिद्धांतलक्षणे नि रूपि
तं। अनुक्तीलिख्युद्घटत्वावच्छिन्नाभावस्यैवतत्प्रत्ययविषयत्वादितिभाव॰। ननुयदा घात्यंता
भावस्यैवघटध्वंसाघत्यंताभावत्वकल्पनानुपपन्निरतआह दीधितावत्यंताभावस्येति। अ
विरोधित्वादिति। ध्वंसाघत्यंताभावत्वासंभवादितिभाव॰ व्याख्यायां। तदभाव इतियदात्यंता
भावएवेत्यादि॰ घटध्वंसाघभावइत्यर्थ॰ सिद्धांतेति अभावजतियोगिकातिरिक्ताभावानं
गीकाररूपसिद्धांतेत्यर्थ॰ भावेवेति अननुगतानामेवाधिकरणानामननुगतघटादिध्वंसाघ 
भावत्वेनतादृशाधीविषयत्वसंभवेवेत्यर्थ॰ भमत्वेतिभावात्मकाधिकरणेष्वभावत्वाभा 
वादितिभाव॰ भावाभावसाधारणभावत्वांगीकारेप्याह। अनेकेषामिति। दीधितावति
रिक्तारेवेति अप्ययदात्यंताभावातिरिक्तस्यतद्ध्वंसाघत्यंताभावस्यकल्पनेगौरवेणा
त्यंताभावस्यध्वंसादिविरोधित्वमंगीकृत्यघटाघत्यंताभावस्यैवतद्ध्वंसात्यंताभाव

त्वकल्पनमनुचितं। नचैवंभाविनिविनष्टो घटो हूत्पाले घटो नास्तीति प्रत्ययानुपपत्तिरूपदर्शिनि रीत्या दुर्वारैतिवाच्यं। ध्वंसादेरसामान्याविछिन्न प्रतियोगिताकत्वस्य सामयिकत्वाभ्युपगमे नोपपन्नैरितिचेन्नतथासतिपरादिकालेतत्तद्ध्वंसाद्यभावप्रतीत्यनुपपत्त्योपदर्शितभेदाद्यस्य प्रामाणिकत्वेनाद्दोषादितिदिक्। इतिचप्रत्ययइतिइत्याकारकात्यंताभावप्रत्ययविलक्षण प्रत्ययइत्यर्थः नत्वोक्तानामितितथाचप्राग्भावस्यकथंचिदपिनप्रत्यक्षमितिफलितं। व्याख्यायांशब्देतिप्राग्भावशब्देत्यर्थः संभवद्विषयांतरतया। प्राक्कालीनाभावादिविषयकतया तादृशेति अत्यंताभावविलक्षणप्राग्भावरूपेत्यर्थः अन्यथासंभवद्विषयांतरत्वेपि शब्दस्यवस्त्वंतरसाधकत्वे। प्राग्भावंखंडयिष्यतांधांकृतेरीधितावपेतिव्याख्यायांकार्यस्यपूर्वत्वव्यवहारादेः अन्यथाध्वंसादिघटितत्वेनैव। उपपादनेपि। उपपादयिष्यमाणत्वेपि। प्रत्यक्षस्येति। निरुक्तप्रत्यक्षस्येत्यर्थः। नातिरिच्यतेति। तथाचतत्पूर्वत्वादिव्यवहारस्य ध्वंसघटितत्वेनैवप्राग्भावघटितत्वेनाप्युपपादयितुंशक्यतयाविनिगमना

भवानं·टी°
२१
विरहेण प्रागभावस्यापि सिद्धिर्निराबाधैवेति भावः तादृश प्रत्ययस्योत्पत्त्यंशे भ्रमत्वमाशंक्या
ह। तथा चेत्यादि अतिरिक्ताभावेति अत्यंताभावातिरिक्ताभावेत्यर्थः भान्यास्तु उत्पत्तिप्रत्य
यस्य स्वसमवेतगुणानधिकरणसमयसंबंधरूपध्वंसाघटितोत्पत्तिविषयकत्वसंभवेन ध्वं
सप्रागभावयोरुभयोरप्यसिद्धौ विनिगमनाविरहेण प्रागभावघटितोत्पत्तिविषयकत्व
संभवेन चातिरिक्तध्वंससाधनाय दीधितौ तादृशविलक्षणप्रत्ययांतरानुसरणमिति प्रा
हुः उत्पन्नेरिति। अतींद्रियतयेति दोषः अनन्यथासिद्धं। अन्यथानुपपद्यमानं। तत्प्रति बंदी
ति घटोत्पत्तिप्रतिबंदीत्यर्थः दीधितावतिरिच्यतामिति अत्यंताभावभिन्नतया सिद्ध्यत्वित्य
र्थः प्रागभाव इति अतिरिक्त इति पूर्वानुषंगेणान्वयः घटप्रागभावो नष्ट इत्यादिविल
क्षणबाधितनाशप्रत्ययस्यासिद्धत्वेत्याशयः अत्रेदं चिंत्यं ईदृशप्रत्ययस्यासिद्धत्वेतादृ राम
शप्रत्ययस्याप्यसिद्धत्वस्य सुवचत्वात् विनिगमकाभावादिति। तत्पूर्वत्वादीति आदिनात २१
दन्यपूर्वत्वादिपरिग्रहः। आस्मायां ध्वंसे नीति। नन्वेवमपि मानाप्रत्ययेति प्रसंगः। घटि

दि ध्वंसभेदात्मकघटादिध्वंसप्रतियोगिघटादिध्वंसवृत्तित्वादिति वाच्यं। ध्वंसपदस्य ध्वंसत्वनि
रूपकप्रतियोगित्वपर्यन्तलाभप्रयोजनकत्वाभ्युपगमात्। दीधितौ दुःखात्यन्ताभावस्ये
ति अयमाशयः दुःखप्रागभावस्य प्रायश्चित्तनाश्यत्वे प्रायश्चित्तेनोत्तरं तत्प्रतियोगिदुःखस्यो
त्पत्तौ प्रायश्चित्तस्यानर्थक्यं अनुत्पत्तौ च प्रतियोगिसामग्रीरूपनाशकाभावेन तदभा
वस्य नित्यत्वतया प्रतियोगिनिवृत्तिनाभावत्वानुपपत्त्यासिद्धदुःखप्रतियोगिकत्वेन चात्यन्ता
भावत्वमेव ध्वंसप्रागभावयोरत्यन्ताभावविशेषत्वेमानाभावादिति अत्यन्ताभावस्य नि
त्यतया फलत्वासंभवादाह स्वस्मिन्नित्यादिः स्वात्मावच्छेदेनेत्यर्थः दुःखसाधनध्वं
सस्य तदन्यतयास्वतः पुरुषार्थत्वासंभवेन तत्साधनतया च गौणपुरुषार्थत्वासंभ
वेन प्रायश्चित्तफलत्वासंभवात् पूर्वकल्प एव सम्यक् न चोक्तदोषः। नित्यस्यापि योगक्षे
मसाधारणत्वसंभवादत आह आख्यायां नवीनमतमिति स्वतः पुरुषार्थत्वादिति
। वस्तुतस्तु द्वेषविषयाभावत्वस्यैव स्वतःपुरुषार्थत्वप्रयोजकत्वे न सुखदुःखाभावयोरि

वपापध्वंसस्यापिस्वतःपुरुषार्थत्वंसंभवत्येवातएवालिकंटकध्वंसादेःस्वतःपुरुषार्थत्वंतत्र
तत्रोक्तंसंगच्छतइत्याशयः।यत्तुपापध्वंसस्यप्रायश्चित्तफलत्वंनसम्यक्।तथाहि।नतावत्
सामान्यतःपापध्वंसत्वंप्रायश्चित्तजन्यतावच्छेदकमतिप्रसंगात्‌।नापिब्रह्महत्यादितत्तत्
पापध्वंसत्वंतत्तत्प्रायश्चित्तजन्यतावच्छेदकंतत्तत्प्रायश्चित्तंविनापिप्रकारांतरेणतत्तत्पाप
ध्वंसेनव्यभिचारात्‌किंतुतत्तद्विजातीयपापध्वंसत्वमेवतत्तत्प्रायश्चित्तजन्यतावच्छेदकंतत्त
द्वैजात्यंचतत्तत्प्राप्यवृत्तिनानेतिनसांकर्यमपि।एवंचतत्तद्वैजात्यसंदेहेतत्तद्विजातीय
पापरूपनिमित्तसंदेहेनवहुवित्तव्ययायाससाध्येतत्तत्प्रायश्चित्तेप्रवृत्त्यनुपपत्तिःनिमि
त्तसंदेहस्यप्रवृत्तिप्रतिबंधकत्वादिति।तत्रब्रह्महत्यात्वादिसामान्यधर्मपुरस्कारेणनिमि
त्तनिश्चयसत्वात्‌कृष्यादिस्थलेसतीष्टसाधनतानिश्चयेवृष्ट्यादिसंदेहेपिप्रवृत्त्युदयेननिमि
त्तसंदेहस्यसहकारिसंदेहतयाफलसंदेहपर्यवसन्नतयाप्रवृत्तावप्रतिबंधकत्वाच्च।अत
एव।वक्ष्यमाणरीत्यापापादनसंभवादेवआपाद्येतिपुनस्तादृशोऽस्यनिरूपणापाद्येत्यर्थः।आ

पादस्यात् आपादनासंभवात् प्रथमलक्षण एवावाधापादकयोः प्रसिद्धिसत्वादितिभावः
तदभावादेव। तद्घटितसामग्र्यभावादेव हीधितौ कार्यादेरितिजन्यद्रव्यंजन्यरूपादिकं
चप्रति द्रव्यत्वादिनारूपत्वादिनाच प्रतिबंधकत्वेन तज्ज्ञानव्यक्त्यादिकंप्रतिचतत्तद्व्यक्तित्वे
न प्रतिबंधकत्वेन चेत्यर्थः। तेनतुकार्याधिकरणे पूर्वसंयोगादिरूपकार्यस्यावश्यकतयासा
मान्यतः कार्यत्वेन कार्यस्यप्रतिबंधकत्वासंभवेपि नक्षतिः। व्याख्यायांकालीनेति कालोत्रक्षण
रूपः तेनस्थूलकालमादायनदोषः सविकल्पकस्य चतुर्थादिक्षणेपुनरुत्पादापत्तिर्नसं
भवति व्यक्तिपौर्वापर्यनिर्वाहायावश्यकतत्तद्व्यक्तित्वावच्छिन्नहेतुताकविशेषणज्ञानविर
हादित्याशयेनाह निर्विकल्पकस्येत्यादि द्वितीयतृतीयक्षणयोः पुनरुत्पादापत्तेर्निर्विकल्प
कप्रतिबंधकत्वेनैव निरासंभवादाह चतुर्थक्षणइति चतुर्थादिक्षणइत्यर्थः। तत्र
चहेतुः संयोगादिघटिततन्निर्विकल्पकप्रतिबंधकत्वेनैव निरासंभवादाह चतुर्थक्ष
णइतिचतुर्थादिक्षणइत्यर्थः तत्रचहेतुः संयोगादिघटिततन्निर्विकल्पकसामग्र्या

स्तृतीयादिक्षणेऽपि सत्वादिति भावः। तत्कालीनेति कार्योत्पत्तिकालीनोत्पत्तिकेत्यर्थः। ध्वंसा
दीति ध्वंसान्यस्यापि तादृशस्य विनिगमनाविरहेण प्रतिवंधकतयापत्तिर्नातस्येत्यर्थः
विनिगमनाविरहेणेति। तेषां हेतुतयाप्युत्पन्नपुनरुत्पादवारणसंभवादिति भावः। हेतुता
याइति। अनंतहेतुतायाइत्यर्थः। प्रागभावहेतुतामतेऽप्युत्पन्नेति तत्तत्कार्ये यत्किंचित्प्राग
भावसत्वेन पुनस्तत्तत्कार्योत्पादवारणाय विशिष्यैव तस्य वाच्यत्वादिति भावः। मिथ्याज्ञा
नवासनायाइति मिथ्याज्ञानजन्यसंस्कारस्येत्यर्थः। मिथ्याज्ञानं चात्माऽशरीरादावभे
दावगाहि ज्ञानं कल्प्यत इति तथा च तत्वज्ञानिनां तत्वज्ञानेन वासनानाशान्न धर्माद्यु
त्पत्तिरिति भावः। अनंतत्वादिति। तथा चानंतहेतुताकल्पने गौरवमिति भावः। अथ तत्ता राम २३
सामानंतत्वेऽपि वासनत्वाख्यस्य संस्कारत्वव्याप्यमिथ्याज्ञानजन्यसंस्कारगतजातिवि
शेषस्य जनकतावच्छेदकतया नानंतहेतुताकल्पनमिति चेन्न। पटुतरत्वजात्या सांक
र्येण तादृशजात्यसिद्धेः न च पटुतरत्वजातावेव मानाभाव इति वाच्यं। पुनः पुनः स्म

रस्य जन्यत्वावच्छेदकतयैव तत्सिद्धेः। ननु स्वसमानकालोत्पन्नपदार्थानां प्रागभावस्य
सम्वलितयत्त्वादिकेऽपि न नानंतानां कारणत्वकल्पनमत आह किं चेति। न चेति। तस्य
भावत्वइतिशेषः। ध्वंसप्रतियोगीति। जन्यसत्त्वस्य कार्यतावच्छेदकत्वे प्रागभावानं
गीकारे जन्यत्वस्य प्रागभावप्रतियोगित्वरूपत्वासंभवेन ध्वंसप्रतियोगित्वरूपत्वमि
त्याशयेनेदं। अनादित्वे निर्विनाशिसम्ये तस्य सादित्वनियमादिति भावः। अनुपप
त्तिरिति इति न तस्य भावत्वमितिशेषः। अतएव तस्य भावत्वाभावादेवसः निरुक्तो
धर्मो धर्महेतुः सामान्यादितुल्यत्वेतिविनाशितया सामान्यादित्वाभावेन तुल्यतो
त्पत्तिर्नं। भावत्वेनाभावत्वेन चेति विनाशिसमये न भावस्य सादित्वनियमेत्तद्भाव
त्वेनानिर्णयः समवेतत्वादभावत्वेनानिर्णयः जितमिति तेषां मनाद्यविद्यावादि
नयात तस्यैवानाद्यविद्यानाम्यकत्वादिति भावः। अधिकमग्रे वक्ष्यामः सामग्र्यवच्छे
दितोत्तरकालस्य स्वसामग्रीसमय ध्वंसाधिकरणसमय ध्वंसानधिकरणसमत्वेन

भवानं·टी·
२५

स्यानन्त्विति तथा च नोक्तशीत्योत्पन्नपुनरुत्पाद्यापत्तिरिति भावः अत्र चनन्त्वित्यादिकमुत्प
त्तिपर्यन्तनिवेशस्य व्यर्थतया तत्तु गतिमनुरुध्योक्तं तेन निरुक्तसामग्र्यव्यवहितोत्त
रकालस्य कार्योत्पत्तिमत्वेन नियमेपि द्वितीयादिक्षणस्य निरुक्तसामग्र्यव्यवहितोत्त
रकालत्वाभावे नोत्पन्नपुनरुत्पादापत्तिवारणसंभवेपि न क्षतिः एतेन सामग्र्यव्यव
हितोत्तरकालत्वं घटादिपदार्थानुगतं तस्य कार्यवत्वेन नियमेपि निर्विकल्पकस्य तत्तृतीयादि
क्षणे घटादितन्तुसंयोगनाशानष्टस्य विशालादितन्तुकपटस्यावस्थित क्षणादितन्तुकपटो
त्पत्तिकाले पुनरुत्पादापत्तिर्दुर्वारा यदि च तन्निरुक्तरूपं तस्य कार्योत्पत्तिमत्वेन नियमेपि राम
नोत्पन्नपुनरुत्पादापत्तिर्द्वितीयादिक्षणस्य निरुक्तसामग्र्यव्यवहितोत्तरकालत्वाभावा २४
दिति। ननु कार्योत्पत्तिमत्वेन नियमेपि नोत्पन्नपुनरुत्पादापत्तिर्द्वितीयादिक्षणस्य
निरुक्तसामग्र्यव्यवहितोत्तरकालत्वाभावादिति। ननु कार्योत्पत्तिमत्वेनेत्यसंगत
मिति दूषणं निरवकाशं। ननु व्यापके व्यर्थविशेषणत्वस्य दोषतया योत्पत्तिनिवेशा

स्वासमर्थत्वपावस्तुगत्यनुरोधोपि कल्प्यमितिचेदत्रब्रूमः ऽदेश्यपासिद्धिरेवतत्स्वादोषत्ता
यांबीजंयथाऽसंदृष्टवन्हिमानित्यादोयत्रचप्रकारांतरेणदेश्यसिद्धिस्तत्रतस्यदोष
त्वमेवएवंचप्रकृतेस्वाधिकरणसमयध्वंसाधिकरणत्वस्यद्वितीयादिक्षणेस्वसाम
ग्रीसिद्धतयातदनधिकरणत्वस्यप्रथमक्षणएवसंभवेनस्वाधिकरणसमयध्वंसा
नधिकरणसमयसंबंधरूपोत्पत्तिमत्त्वस्यार्थसिद्धतयोत्पत्तिनिवेशवैयर्थ्यंसुवचमे
व।अतएवनचव्यापकेनञर्थविशेषणताबीजाभावादित्यादिप्राचीनग्रंथाअनु
काभिप्रायकाएवेतिदिक्।तदधिकरणक्षणेति।अत्रद्वितीयादिक्षणसंबंधेऽतिव्या
प्तिवारणायपदत्वंतंप्रागभावविशेषणंप्रथमक्षणप्रागभावस्यापितदधिकरण
महाकालवृत्तितयाऽसंभववारणायक्षणेति घटसमानकालोत्पत्तिकक्रियाघा
त्मकस्थूलकालसंबंधेऽतिव्याप्तिवारणायचरमक्षणपदंमहाप्रलयोत्पत्ति
साधारणंचेदं।महाप्रलयात्मकचरमध्वंसात्मकक्षणमादायैवतत्रलक्षणसम

भवानं०टी०
२५

न्वयात्। महाप्रलयानंगीकारे गुरुक्षणस्य त्वघटितमिदं पूर्वविरलाशयेन लाघवात्। तद
धिकरण यावत्कालेति। अत्र द्वितीयादिक्षणसंबंधेऽतिव्याप्तिवारणाय चरमाधिकरणं
तं कालविशेषणं। प्रथमक्षणस्यापि यावत्कालप्रागभावानधिकरणत्वासंभववा
रणाय तदधिकरणेति प्रागभावविशेषणं तदधिकरणं यस्येति बहुव्रीहिणा तद्वृत्त्यर्थकं
वृत्तित्वं च कालिकसंबंधेन प्रथमक्षणस्य प्रागभावस्य तद्वृत्तित्वाभावान्नासंभवः यथा
श्रुते तदधिकरणत्वस्य यावत्कालविशेषणत्वलाभेन यावदंतर्गतमहाकालप्रागभा
वाप्रसिद्ध्या प्रथमक्षणस्य तादृशयावत्कालांतर्गतप्रथमक्षणप्रागभावानधिकरण
त्वेन चासंभवस्य दुर्वारत्वात्। द्वितीयादिक्षणस्य तादृशतृतीयादिक्षणप्रागभावा राम
धिकरणत्वात्याऽतिप्रसंगात् तादवस्थ्यमतो यावदिति प्रागभावविशेषणं कालिकसंबं २५
धेन तद्वृत्तित्वलाभाय प्रथमं कालपदं कालिकसंबंधेन प्रागभावाधिकरणत्वलाभा
य चरमं कालपदं। न च महाकालस्यापि तादृशप्रागभावाधिकरणतया तत्संबंधेऽति

प्रसंग इति वाच्यं । तादृशप्रागभावावच्छिन्नकालसंबंधस्य विवक्षणे न तादृशमहाकाल
संबंधस्याव्याप्यवृत्तिसंबंधपर्यवसन्नतया लक्ष्यत्वेनादोषात् । केचित्तु प्रथमक्षण
स्य न तदधिकरणत्वं किंतु तत्रस्य द्वितीयादिक्षणस्य वाधिकरणत्वमित्यत्र कुरेशिम
तानुसरणे न यथाश्रुतार्थलाभ्यं तदधिकरणत्वस्य यावत्कालविशेषणत्वमेव सम्य
गित्याहुः । घटाद्यधिकरणेति । घटादिसंबंधेत्यर्थः अधिकरणतापर्यंत निवेशे गौर
वात् प्रयोजनाभावाच्चेत्याशयः यथाश्रुते विवक्षितायां अधिकरणत्वानियामक
तयाऽसंगतेः असंभव इति । इदमुपलक्षणं संयोगादिना घटाद्यधिकरणस्य यो ध्वंसस्तद
नधिकरणस्य यो ध्वंसस्तदनधिकरणत्वस्य द्वितीयादिक्षणे विसत्वेनातिव्याप्तिः स्या
दित्यपि द्रष्टव्यं । एतेन प्रकृतपक्षस्याधिकरणत्वानादरेणासंभवं संपाद्य समयप
दोपादाने संदर्भविरोध इति दूषणमप्यनवकाशं । जन्यमात्रस्य कालोपाधित
याज्ञानस्यापि समयत्वाऽदोषतादवस्थ्यमत आह । कालिकसंबंधेनेति । दीधितौ

ध्वंसानधिकरणेति। ध्वंसावच्छिन्नभिन्नेत्यर्थः आधिकरणतानिवेशे गौरवात्समानाभावाद्वे।
आद्यक्षणस्यापि द्वितीयादिक्षणात्मकस्याधिकरणसमयध्वंसाभावाधिकरणतयाऽ
संभववारणाय ध्वंसेति व्याख्यायां भावीति तद्घटपूर्वकालीनस्येत्यादिः भावीति तद्घट
विशेषणं। उक्तरीत्या सामान्यापिसमयत्वादाह कालिकसंबंधाप्रापकमिति। ननूक्तमि
तीति। ननूक्तमित्यादीत्यर्थः कारिकायां द्वितीयादिक्षणयोगेऽतिव्याप्तिवारणाय जन्यं
तमुपात्तं तच्चायुक्तं अध्यस्तइति तथा च स्वक्षणध्वंसानवच्छिन्नस्य क्षणयोग इति फ
लितार्थः। ननु सामान्यतः क्षणः समय इत्यभिधानमयुक्तं द्वितीयक्षणे स्वत्रध्वंस
प्रतियोगिस्थूलकालसंबंधेऽतिव्याप्तिवारणाय द्वितीयक्षणपदस्य क्षणत्ववि राम
शिष्टार्थकताया आवश्यकत्वादत आह अत्र चेति। उपाधित्व इति तादृशस्थूलकालसं २६
बंधस्याप्याद्यक्षणसंबंध एव पर्यवसाने नोपाधित्वमिष्टमेवेति भावः उभयत्र उभ
यत्रापि। अत्रेदं बोध्यं स्वप्रतियोगिवृत्तित्वसंबंधावच्छिन्नप्रतियोगिताककालिकसंबं

घ एव सामान्यतउत्पत्तिस्तेनोत्पत्त्यर्थकपदस्यानतार्थत्वं। द्वितीयादिक्षणसंबंधप्रति
योगितावच्छेदकस्तु तत्ताद्दशध्वंसाभावः द्वितीयक्षणे त्वन्यध्वंसस्यैव तेन संबंधेन घ
टादौ तद्धर्मी सत्त्वेन तदभावासत्त्वादिति। यथाश्रुतेन क्वचिदपीत्यनेनोक्तातिव्याप्ति
वारणासंभवादाह यदीयसमयसंबंधत्वावच्छेदेनेति प्रथमसमयपदमिति। नन्वज
न्यमात्रस्य कालोपाधित्वेनोक्तज्ञानस्य समयत्वान्न दोष इत्यादावस्थायित्वे वाऽत्र आह। प्रथम
समयपदोपादाने नयदीयसमयसंबंध इत्यनेन यदीयकालिकसंबंध इत्यर्थलाभे
नोक्तदोषाभावात्। घटोत्पत्तिपूर्वकालीनतज्ज्ञानसंबंधस्य घटोत्पत्तित्वाभावात् तद्घ
टोत्पत्तिक्षणे इति। अविनश्यदेवेत्यत ज्ञानसंबंधस्योत्पत्तित्वं मध्यमसमयपदो
पादानेप्यसंभवीत्यत आह विनश्यदवस्थमिति। तज्ज्ञानवृत्तीति इदं च संबंध
रूपमेव वृत्तित्वं निविष्टमित्याशयेन विषयितापि वृत्तिनियामकेत्याशयेन वा इष्टव्यं
।अन्यथा पुनः समयपदं स्वरूपकथनपरमेव स्पष्टार्थमत एवाग्रिमतत्क्षणे स्ववृत्ती

स्यैवतत्त्वमपिति ध्येयं। मध्यमसमयपदमिति तथाच कालिकसंबंधेन वृत्तित्वलाभान्न
दोषइतिभावः तृतीयसमयपदमितित्तत्सर्वमुक्तप्रायमेवानन्तरपदीयसमयसामा
न्यइत्यस्यैवसम्यक्त्वेनसंबंधपदं सार्थं न च जन्यमात्रस्य कालोपाधित्वेन भाविघटवि
षयकज्ञानस्यापिघटीयसमयत्वेन तत्राघटध्वंसवृत्तिध्वंसप्रतियोगित्वसत्वेनासंभव
द्वारणाय तदिति वाच्यं। समयपदसमभिव्याहारेणघटीयेत्यत्रकालिकसंबंधलाभे
नैवतद्वारणादितिचेन्नध्वंसे तस्यादिकादिकार्यांसंबंधोपादाने नात्रापितद्वापत्ते
रु। घटपदार्थेन्निसमं समयस्यान्वये नयथासंनिवेशे वैयर्थ्याभावात्। ननु क्रियेति।
अत्र क्रियामात्रस्येति ध्वंसस्येति चसावधारणं अन्यथा जन्यमात्रस्य कालोपाधि राम
त्वाप्रतिरूपेपेरणवृत्त्यसमवाचाणतिव्याप्त्यसंगतेः अनुपपन्नमेव चैतच्चरमेभविष्यति। ननु २७
प्रतिरूपणं कस्यचिद्विनाशे न जन्यमात्रस्य कालोपाधित्वेन तद्धटे स्यादद्वितीया
दिरूपण विनष्टपदार्थसंबंधस्यापि तद्घटीयसमयसंबंधत्वाक्रान्ते तया तस्य च द्विती

यादृक्षणवृत्तिध्वंसप्रतियोगित्वान्नोक्तातिव्याप्तिरत आह तद्धूरे स्यादेति। कालोपाधित्वाभा
वादिति। जन्यमात्रस्य कालोपाधित्वानंगीकारादित्याशयः। अत एव पूर्वं क्रियामात्र
स्यैव त्याद्युक्तं प्रतिक्षणं क्रियाया विनाशाभ्युपगमे द्वित्रिक्षणमध्ये क्रियाया विनाशो
न जात इत्येवासिद्धम् अत आह। प्रतिक्षणमिति। लक्षणं। उत्पत्तिलक्षणं। निरुक्तेति।
अवच्छेदकत्वस्यानतिरिक्तवृत्तित्वरूपस्य व्याप्यत्वे पर्यवसानादिति भावः। न त्विति। तथा
च सचेति [illegible] निर्देशोनुपपन्नेपि इति भावः। न तदधिकरणेति न च विरातीतविशेषानि
रुक्तप्रतियोगितानां तदधिकरणलक्षणवृत्तित्वव्याप्यैवेति वाच्यं। स्ववृत्तिध्वंसप्रति
योगितात्वे तदधिकरणक्षणवृत्तित्वव्याप्यतावच्छेदकत्वविवक्षणात्। अत्र व्या
प्यत्वं तदभाववदवृत्तित्वं तदधिकरणक्षणवृत्तित्वाभाववत् तदधिकरणक्षणवृत्ति
त्वमेव एवं च तदधिकरणक्षणवृत्तित्वमेव निरुक्तं व्याप्यत्वमिति पर्यवसितं। एतेन
तदधिकरणक्षणवृत्तिवृत्तिस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं तदधिकरणक्षण

भवानंदी·टी·

२८ वृत्तिध्वंसप्रतियोगिक्षणसमयवृत्तित्वमेव चोक्तमिति लक्षणमस्तु व्याप्यत्वाप्रवेशेन लाघवादित्य

29 पि परास्तं। तस्य लक्षणान्तरत्वेन एतल्लक्षणे यथासंनिवेशे वैयर्थ्याभावात्। यत्तु अत्र

तद्वृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकत्वमेव विवक्षितं लाघवात् एवं च तद्वृत्ति

स्ववृत्तिध्वंसप्रतियोगिताकत्वोक्तौ द्वितीयलक्षणे द्रावत्यतिव्याप्तिरिति तन्न अजन्यमात्रस्य

कालोपाधित्वाभावमभ्युपगम्यैतल्लक्षणावतारे नकालिकसंबंधेन तद्वृत्तित्वाप्रसि

द्ध्या तद्वृत्तित्वघटितलक्षणासंभवात् यथासंनिवेशे वैयर्थ्याभावाच्च। अतएव तद्

वृत्तिप्रतियोगिकत्वव्याप्यस्ववृत्तिध्वंसत्वकसमयवृत्तित्वमेवोत्पत्तिर्लाघवादित्यपि नि राम

रस्तमित्यपि दिक्। पूर्वोक्तेत्यत्र घटोत्पत्तिक्षणे इत्याद्युक्तेत्यर्थः तद्वारणाय वा यदीति। अ २८

पि ना कालिकसंबंधेन ध्वंसस्य स्ववृत्तित्वलाभसमुच्चयः स्वजन्येति न चैवं विभागोत्प

त्त्यनन्तरं रूपं क्षणव्यवहार इति वाच्यं। तादृशक्रियान्तरादेव तद्व्यवहारात्। आद्यक्ष

णावच्छिन्नस्य कर्मणा एव क्षणत्वमित्याशयेन तल्लक्षणे लक्षणमुक्ता तादृशस्य स्थिर

मात्रस्यैव लक्षणत्वमित्याशयेन लक्षणं तस्याह स्ववृत्तीति। द्वितीयादिलक्षणेऽनन्तपदार्थ
मादायासंभववारणाय प्रतियोग्यन्तं पदार्थविशेषणं। अतीतपदार्थमादाय तद्वारणा
य स्ववृत्तीति लक्षणे ध्वंसाद्यात्मकस्थूलकालेऽतिव्याप्तिवारणाय यावदिति। इदं च ल
क्षणद्वयं महाप्रलयानंगीकारे बोध्यं तदंगीकारे तु तदुत्पत्तिक्षणेऽव्याप्त्यानोक्तं लक्ष
णं किं तु स्वावृत्तिप्रागभावप्रतियोगिस्ववृत्तियावत्पदार्थविशिष्टसमयत्वमिति लक्ष
णं बोध्यं। अखण्डकालेति। क्षणिकमित्यादिः आदिना ज्ञानादिपरिग्रहः। स्ववृत्ति
रिति स्ववृत्तित्वं च य लक्षणमात्रघटीत्याकालिकसंबंधेन बोध्यं। अत्र ध्वंसप्रतियोगिनो
रेकक्षणवृत्तित्वाभावेन स्थूलकालवृत्तित्वेन च नासंभवातिप्रसंगौ। सत्वादीति। अ
संभववारणाय विशेषः। न च तथापि ध्वंसाद्यात्मकघटाभावादिभेदप्रतियोगिघ
टाभावाद्याधारत्वेनासंभवतादवस्थ्यमिति वाच्यं। ध्वंसत्वनिरूपकतस्य प्रतियोगि
तायां निवेशे तोक्तदोषाभावात्। अथात्रव्यासज्यवृत्तिधर्मावच्छिन्नभेदमादायाति

मवागंसी-टी०
२९ प्रसंगवारणाय स्ववृत्तिध्वंसप्रतियोग्याधारत्वावच्छिन्नभेदस्य विवक्षणीयत्वात्तथा च समह्या
प्रलययोस्तवृत्तिरूपस्याऽव्याप्तिस्तत्र लाघवेन ध्वंसप्रतियोग्याधारत्वस्यैवावच्छेदकत्वात्महा
प्रलयवृत्तिध्वंसप्रतियोग्याधारत्वावच्छिन्नभेदासत्वादिति चेन्न। विशेषणे एकदेशेपि
रूपस्य निवेशात्। गुरोरप्यवच्छेदकत्वमित्याशयात्। अत्र स्वप्रतियोग्यधिकरणवृत्ति
स्ववृत्तिसंबंधेन ध्वंससामान्याभावविशिष्टत्वमनुगतं रूपं तत्त्वं बोध्यं। अनंगीकारे
त्विति। तथा च भेदस्य व्याप्यवृत्तितया स्थिरस्य कर्मादेः कथमपि स्ववृत्तिध्वंसप्रतियो
ग्यनाधारत्वासंभवात्संभवइति भावः। यत्तु प्रतियोग्यनाधारत्वं न प्रतियोग्या
धारभिन्नत्वं किंतु प्रतियोग्याधारताविरहः प्रतियोगिविरहएव वाऽपोस्यादि रूपस्या
त्विं २ वच्छेदेन स्ववृत्तिध्वंसप्रतियोग्यधिकरणस्यापि कर्मादेरंत्यक्षणावच्छिन्नस्य तादृशा २९
भावाविशिष्टत्वान्नासंभव इति नवीनैरुक्तं तत्[illegible]त्वं स्थूलकालेपि तादृशध्वंसानधि
करणदेशावच्छेदेन तादृशध्वंसकालेपि तादृशध्वंसप्रतियोग्यनाधारत्वसत्वेनातिप्र

संगात्। यावानिति इदं चलादृशायत्किंचित् ध्वंसवैशिष्ट्यमादायातिप्रसंगवारणाय। लक्षण
त्वे लक्षणत्वसंभवे किंचित्कालावृत्तित्वं किंचित्कालावृत्त्यभाववत्त्वं पूर्ववर्तित्वं कालिकसंबं
धेन स्ववृत्तित्वस्य यावदभाववैशिष्ट्यस्य चलाभावेत्यर्थः। अतिरिक्ताभावानंगीकार इति
तथा चातिरिक्ताभावघटितयुक्तलक्षणं न संभवतीति भावः। न चैवमप्यधिकरणात्मका
भावघटितमोषोक्तलक्षणमस्त्विति वाच्यं। प्रतिक्षणस्यचिदुत्पत्तिविनाशेन चलादृशलक्षण
स्यासंभवग्रस्तत्वात्। ग्रंथ्यविरोधादिति। इदं चातिरिक्तध्वंसघटितं स्वपूर्वत्वमि[redacted]साशयेन
। वस्तुतस्तु तस्याधिकरणात्मकध्वंसघटितत्वेन कोपि ग्रंथविरोध इति ध्येयं। केचित्तु स्वस्वपू
र्ववर्तीति ग्रंथोतिरिक्ताभावानंगीकार एव। स्वपूर्वत्वं चेत्पारिकृतु अतिरिक्ताभावपक्ष एव
व लक्ष्यतीति न तत् ग्रंथविरोध इत्याहुः। उभयं। स्ववृत्तित्वस्य पूर्ववृत्तित्वोभयं। द्वितीयादिक्ष
णेपि स्वस्वपूर्ववर्तियत्किंचित्पदार्थवैशिष्ट्यसत्त्वात् इति व्याप्तिरतो यावदिति कालिकसं
बंधेन स्वपूर्ववृत्तित्वनिवेशप्रयोजनमाह सेनेति। कालिकसंबंधेन स्ववृत्तित्ववैशिष्ट्यानि

भवा०टी
३०
वेधार्यो: प्रयोजनमाहनवेत्यादिना। असत्वेपीति। अव्याप्तिरित्यनेनान्वयः सत्वेपि। उक्तज्ञानेसत्वेपि
। अतिव्याप्तिर्वेत्यनेनान्वयः स्वपूर्वत्वमितिस्वरूपलक्षणप्रविष्टमित्यादि। उत्पत्तिलक्षणप्रविष्टस्व
३ णस्येति। उत्पत्तिघटितत्वादित्यस्य स्वरूपघटितोत्पत्तिघटितत्वादित्यर्थः स्वानंतरोत्पन्नस्वस्वघटिती
य स्वरूपेणोत्पन्नस्य चासंभवेनोक्तरीत्यामहाप्रलयस्वरूपेणाव्याप्तिरित्याशयेनाह। महाप्रलया
दिरिक्तस्वरूपेणेति। यावदीतीति। कालविशेषणमितिशेषः अत्र नव्याः स्वानधिकरणत्वे सति स्व
वृत्तिध्वंसप्रतियोगित्वं स्वपूर्वत्वमित्येव ज्यायः एवं स्ववृत्तिप्रतियोगिकध्वंसाधारत्वाभाव
विशिष्टत्वं स्वप्रतियोगिमत्तादात्म्यसंबंधावच्छिन्नध्वंसाभावविशिष्टत्वार्थकं महाप्रलयसाधा
रणमव्याघटस्वरूपेणावच्छिन्नकर्मादिसाधारणं स्वरूपत्वमव्यधेयमितिप्राहुः। नस्यादिति। घटपूर्व राम
कालाप्रसिद्धेरितिभावः स्थिरघटादिस्थले स्वरूपद्वयमध्ये क्रियायाउत्पत्तिविनाशाभावेपितत् ३०
तीयादिस्वरूपेणासंभवेन तदधिकरणस्वरूपाप्रसिद्ध्यालक्षणत्वेनाव्याप्तिरित्याशयेनाह ज्ञा
नाद्युत्पत्ताविति अस्थिरेत्यादिः प्रतिस्वरूपं क्रियोत्पत्तिविनाशयोः संदिग्धतयानोक्तदोषनि

स्वपदस्यत्र आह महाप्रलयो त्वन्ना चिति अव्याप्तिरिति। महाकालस्य घटघटत्वाभावात्तत्संबंधस्यो
त्पत्ति[illegible]त्वाभावाच्चेत्यर्थः। अव्यावर्त्तकत्वादिति महाकालीयघटाद्यधिकरणतायाइत्यादिः
एतमतेपि। अनुप्रवेशेति अवच्छेदकत्वेत्यादिः तेषामेवेति आवश्यकत्वादिति भावः। मान्यास्तु
त्र्यमात्रस्येवेति इदानीं घटइत्यादिप्रतीतेर्यदि [illegible] महाकालोधिकरणत्वेन विषयस्तदा सर्वेव ता
दृशप्रतीत्यापत्तिः यदि च नित्यपदार्थवृत्तित्रसरेणुनित्यस्याव्यावर्त्तकत्वात्स एव दोष इति व्या
न६ वर्त्तकतत्तत्कालीय[illegible] पदार्थेन व्यावर्त्तकेनावच्छिन्नमहाकाल एव विषय इति काल। विशेषणमे
वकालोपाधिः विनिगमनाविरहादुपाध्यावधिकरणत्वमित्याशय इति प्राहुः। उक्तरूपेति स्ववृ
त्तिध्वंसप्रतियोग्यनाधारत्वादिरूपेत्यर्थः। दोषइति पूर्वोक्त इत्यादिः चरमध्वंसस्यैव घटत्वादिति
इदमुपलक्षणं चरमध्वंससंबंधस्यैव चरमध्वंसरूपमहाप्रलयोत्पत्तित्वादित्यपि द्रष्टव्यं मतां
तरमाह नत्विति। कश्चिदिति। अत्र महाकाले घटत्व व्यवहारविषयत्वस्य केनाप्यनंगीकारा
दितं प्रसक्तप्रतिषेधापत्तिरेवास्वरसः घटत्वघटितमिति तन्नाघवादित्यादिः अत्र व्याख्यातृ

))

मतेसीधितावुत्पन्नेरित्येवपाठः उत्पन्नेरित्यपि केचित्तदिति पाठस्तु प्रामादिकः एतल्लक्षणस्य नि
र्दुष्टत्वादिति ध्येयं अत्रापि लक्षणं घटितोत्पत्तिलक्षणेपि। इत्ति वो ध्यं इत्यतो जन्यमात्रस्यैव का
लोपाधित्वं। दीधितेोनैवमिति एवमस्माकं किं चिन्तापतीयत इत्यन्वयः तथा च प्रागभावानंगी
कार इष्टापत्तिरिति भावः परादीनां देशान्तिमोक्षपत्तेः ये प्रागभावांगीकारस्तावदपकतया क्व
मेकदेशिनां प्रागभावानंगीकार इत्याशयेन एकदेशिमते एवं तदस्य शंकते अथैति। परस्येति
।स हस्ततंत्वारंभारब्धस्येति शेषः स्वानधिकरणेत्विति मित्यसंयुक्ते इति शेषः स्वानधिकरण कु
पालादीनां स्वरूपायोग्यत्वादेवन तत्र पटोत्पादनसंभव इत्यत आह। तंतुष्विति [illegible] आरब्धा
यां तेषामपि स्वानधिकरणतंतूनामपि यात्किंचिद्धतंतुः यत्किंचिद्धतंतुत्पत्तेः स्वानधिकरणे राम
ष्वतादृशतंतुषु। तत्पटत्पादनं तत्पटोत्पत्त्यापादनं। वस्तुतस्तु। यत्किंचिद्धते इति तत्पटापा ३१
दानमिति च पथ्याश्रुतमेव सम्यक् पूर्वोपदर्शितरीत्या तत्तावन्नसामग्र्याः कार्यस्यैव व्याप्यत
याकार्योत्पत्तेरव्याप्यत्वात्। तथा च तत्पटत्वस्य कार्यतानवच्छेदकतया तादवच्छिन्नापत्तेर्न सं

भवतीति भावः। कादाचित्कत्वं। किंचित्कालानुत्पत्तिकत्वं कारणेति तत्कालाव्यवहितपूर्ववर्
त्तिकारणाभावप्रयोज्यमित्यर्थः काचित्कत्वस्य किंचिद्देशानुत्पत्तिकत्वस्य। कारणेति
तद्देशवृत्तिकारणाभावप्रयोज्यत्वादित्यर्थः इत्थं च प्रतिबंधितानुत्पादवारणायेत्यस्यानुत्पा
दोपपन्नयेइत्यर्थः कार्यानुत्पत्तेः कारणतावच्छेदकावच्छिन्नाभावप्रयोज्यत्वादिति भावः सा
मानाधिकरण्येतिसमवायघटितेत्यादिः। उक्तक्रमेणैवेति। तादृशधीमत्तितादृशेच्छा
ऽस्येव तत्कृत्यसत्त्वापादकाभावइतिरीत्यर्थः। मान्यास्तु कारणवैचित्र्येण कार्यस्याप्य
वैचित्र्येण यावत्पदार्थानामेकत्वे तत्पटत्वस्यैव पटत्वरूपतया तत्पटत्वावच्छिन्नापादनं सं
भवत्येव न चैवमिष्टापत्तिरिति वाच्यं। फलतः सर्वेषां पदार्थानामभेदापत्तेः पर्यवसा
नादिति प्राहुः। तत्त्वेन तत्त्वेन तन्नघटितत्वेन कथमिति सामान्यसामग्र्या एवापादि
कायाः सत्वादिति भावः तत्पटत्वेति। तद्धर्मावच्छिन्नविशेषसामग्रीसहकृताया एव सा
मान्यसामग्र्यास्तद्धर्मावच्छिन्नफलव्याप्यत्वादिति भावः तत्पदानधिकरणतंतुरूप

भवा॰नं॰टी॰
३२

विशेषसामग्र्येव तत्राप्यस्तीत्यत आह तत्त्वयानधिकरणे अभावादिति विशेषधर्मावच्छिन्न
हेतोरेव विशेषसामग्रीत्वेन तादृशसंस्कारानां न विशेषसामग्रीत्वमिति भावः। ननु तत्पदस्य सम
३ वायेन स्वाधिकरणत्वं तत्तरेष्वपि सत्त्वेन तत्र तादात्म्येन तत्तत्तोरभावेन व्यभिचारात्कथं तत्तद्व्यक्ति
त्वेन तत्तत्संस्कारानां तत्पदजनकत्वमत आह। अत्रेदमवधेयमित्यादि लाघवादित्यन्तं। उत्पत्तिसंबं
धेनेति। तत्पूर्वकाले। तदव्यवहितपूर्वकालीनत्वमिति। तथा च दैशिकव्यभिचारस्य दैशिक
व्यापकताविघटकत्वेन हेतुताविघटकतया विशेषकारणतायां कालिकव्यापकताया
दैशिकसामानाधिकरण्यमात्रस्य च निविष्टत्वेन दैशिकव्यापकताया अनिवेशे नोक्तदैशि
कव्यभिचारस्य न दोषत्वमिति भावः। एककालीनत्वादिरूपं विशेषसामग्रीवैशिष्ट्यसामा
न्यसामग्र्यामस्त्येवेत्यत आह विशेषसामग्रीवैशिष्ट्यं चेत्यादि। नन्वेवं कस्याश्चिद्विशेष
सामग्र्यास्तादात्म्यरूपं वैशिष्ट्यं कस्याश्चित्समवायरूपं तदित्यननुगमः। किं च यत्किंचिद्विशे
षसामग्रीवैशिष्ट्यस्यातिप्रसक्ततया यावद्विशेषसामग्रीवैशिष्ट्यमेव सामग्रीव्याप्तिघ

राम
३२

रकं वा व्यभिचारित्युक्तसामग्रीव्यभिचारसंभवः क्वापितंतुरूपसामान्यसामग्र्यां यावत्तत्तंतु तत्तत्सं
योगवैशिष्ट्यासंभवादित्यत आह स्वपक्षेपघमिति अयमाशयः याद्दशविशेषसामग्र्या
येन संबंधेन हेतुतावस्थास्तस्य एव संबंधो वैशिष्ट्यमिति नानुगमः तंतुरूपसामान्यसाम
ग्र्यां प्रत्येकं यावत्तत्तंतुत्वादिरूपविशेषसामग्रीवैशिष्ट्यं निवेश्य नानासामग्रीव्यभिचा
मभ्युपगमात् न चरमोपि विशेषइति। सर्वत्रैव कारणतायां व्यापकताद्वयमेव निविशतइति
नियमवादिनां मतं अत्रैव हेमो। केचित्तिति। व्यभिचारसंभवादिति लक्षं तु त्वेन तस्य रत्वेन का
र्यकारणभावे कालिकवैशिष्ट्यव्यापकताद्वयमेव निविशतइति शेषः नन्वेवमपि
क्रियासंयोगयोः कार्यकारणभावे व्यभिचारेण व्यापकताद्वयनिवेशासंभवेन पूर्वोक्तप्र
कारस्यावश्यकत्वे किमर्थमेतावान्प्रयास इत्यत आह। एवमिति अपुरिसस्वर
सोऽभावत्वं लघीजं तैवमपि समवायेन कार्योत्पत्तिनियामकत्वाभः तादात्म्येन कार्योत्प
त्यधिकरणे स्वस्मिन् पूर्वक्षणे कारणसत्त्वासंभवस्तु। तस्य पूर्वमसत्त्वात्। किं च विशे

स्वरूपेण संबंधत्वाभावात्स्वानुयोगिकसमवायेन हेतुत्वासंभव एव एतेन तत्तन्तंतु निरूपि
तसमवायेन पटं प्रति तादात्म्येन तत्तंतुत्वेन हेतुत्वमिति न व्यभिचार इत्यपि निरस्तं ॥
न च यास्तु तत्तंतुजन्यतावच्छेदकतत्तंतुसमवेतत्वविशिष्टपटत्वमिति न व्यभिचार इत्या
हुस्तदपि चिंत्यं तत्पटत्वावच्छिन्नकारणतायैव दीधितिकृतोक्तस्य तत्पटोत्पादद्वारकस्योचि
तत्वात् । सामानाधिकरण्येति । समवायविशेषणतोभयघटितेत्यादि । दीधितौ प्रतियो
गीति । जन्यभावत्वावच्छिन्नं प्रत्येव जनकत्वादिति । तथा च यद्विशेषयोरिति न्यायेन समवा
येन जन्यभावत्वावच्छिन्नं प्रति विशेषणतया प्रागभावत्वेन हेतुत्वमित्याशयः । यत्तु विल
क्षणप्रतियोगितासंबंधेन कारणतातादात्म्येन च कार्यमित्याशय इति तच्चिंत्यं स्वाश्रय एव राम
प्रतियोगिजनक इति नियमस्यास्वारस्यात् समवायेन कार्योत्पत्त्यनिर्वाहाच्च । ननु द्वयोस्तंतवोः ३३
कारणत्वकल्पनमपेक्ष्यैकस्य प्रागभावस्य कारणत्वे लाघवमिति युक्त्यानेकत्र प्राग
भावासिद्धावपि द्वितंतुक एव प्रागभावसिद्धिसंभवेनान्यत्र प्रागभावासिद्धावित्यादि

नाद्धितंतुके प्रागभावसिद्धेरन्यत्र प्रागभावसिद्धिफलकत्वोक्तिरयुक्तेत्यत आह व्याख्यायां
द्वयोरेवेति आशयः अनेकत्रेत्यादिग्रंथस्याशयः प्रागभावसिद्धिरिति। यत्तु तावता
विद्धितंतुकस्य प्रागभावासिद्धिरेव तत्र त्वद्धित्वादिप्रागभावेनापि तत्पटोत्पत्तिसंभवा
दिति तन्न। विनिगमनाविरहेण बहुविधद्धित्वादिप्रागभावहेतुतामपेक्ष्यैकविधद्धितंतु
कप्रागभावहेतुत्वस्य सिद्धौ बाधकाभावात् अप्योक्तयुक्त्यासिद्धस्यापि पदार्थस्य विनाशि
त्वे भावत्वे च मानाभावेन प्रागभावासिद्धिरेवेति चेदत्र सांप्रदायिकाः उत्पन्नपुनरुत्पा
दवारणाय कार्यादिः जन्ति वंध कत्वकल्पने गौरवापत्त्योक्तयुक्त्यासिद्धस्य पदार्थस्यैवो
त्पन्नपुनरुत्पादवारकत्वं कल्प्यते लाघवात्। तथा च तस्य विनाशित्वसिद्धिरायस्य
कीअन्यथा तद्वारकत्वस्यैवासंभवात्। एवं तस्य जन्यभावत्वे ऽनवस्थापत्त्या तस्या
नादित्वसिद्धावनादिभावस्य नाशासंभवादभावत्वमपि सिद्ध्यतीत्याहुः। नवीनास्
तु तस्य घटादिशानंतरं तद्घाश्रयतंतुषु पटं तरोत्पत्तिसमये पूर्वपटध्वंसेरापत्तिवारस्या

नुसंधेन तस्य विनाशित्वासिद्धेः अन्यथा तादृशकारणस्य सामान्यसामग्रीसहितस्य स
त्त्वे तदापत्तेस्तत्परदिने व्यक्तिध्वंसस्य प्रतिबंधकतामते तेषां दुर्वारत्वात् एवं च सप्रतियो
गिकत्वमप्यावश्यकं अन्यथानुगतप्रागभावनाशकदुर्वचत्वात् सप्रतियोगिकत्वे च
स्ववृत्तिप्रतियोगिकत्वसंबंधेन कालत्वेनैव सामान्यतः प्रागभावनाशकतासंभवात्
सिद्धे च सप्रतियोगिकत्वेऽभावत्वमर्थसिद्धमेवेत्याहुस्तत्रातीवमनोरमं संयोगादिसाधा
रणसप्रतियोगिकत्वांगीकारेऽप्युपदर्शितरीत्या कालस्यैव तन्नाशकत्वसंभवेन सप्रति
योगिकत्वसिद्धावप्यभावत्वासिद्धेर्दुष्परिहरत्वादिति दिक्। तदस्यः शंकते नचेति। तत्र
नवतंतुकपटे। तत्त्वेन। दशातंतुकपटध्वंसत्वेन हेतुत्वादिति। नचैवं तत्र दशातंतुकपटोत्प
त्तिपूर्वं नवतंतुकपटोत्पत्तिर्न स्यादिति वाच्यं। इष्टापत्तेः अन्यथा दृव्यवृत्तिदृव्यानुत्पत्त्या तत्र
दशातंतुकपटानुपपत्तिः नन्वेवं पत्रसंयुक्तनवतंतून्परिधाय श्राद्धं कृतं तदनंतरं तद्दश
मतंतुकपटोत्पत्तिस्तत्र पूर्वपटाभावेन श्राद्धकर्तुः पटापिहितत्वरूपनग्नताश्रयत्वेन

श्राऽऽकृतेगुणपदसंगः तत्र पूर्वं नवतंतुकपटोत्पत्त्यभ्युपगमे तु तत्स्य नवतंतुकपटपिहितत्वे
नानन्वतयानंतु हि गुणत्वमिति महापटपूर्वं स्वल्पपटोत्पत्तिरवश्यमुपेयेत्याशयेनाह इदं
वान्नावधेयमिति प्राक्काले पीति अपिनोत्तरकालपरिग्रहः भवति भवत्येव एतेन महापट
पूर्वं तदाश्रयतंतुषु पट एव नांगीक्रियते तन्नमता पटसामग्री पूर्वकालावृत्तित्तत्पटा
रंभकसंयोगस्य परमात्रप्रतिबंधकत्वकल्पनादिति नवीनोक्तिरपि परास्ता नचै
वं दृश्यवत्ति इत्यां तराभुत्पत्त्या कथं तत्र दृशतंतुकपटोत्पत्तिरत आह। इदं तदेति।अ
भिघातेन वेग्याद्यभिघातादिना तद्वस्यवयविकारणसंयोगनाशेनेति शेषः तत्राशी
व्रं नवतंतुकपटनाश एव चादशतंतुकपटोत्पत्तिरिति तदानीं दृश्याभावरूप
प्रतिबंधकाभावस्य हेतोस्तत्र सत्त्वादिति एतेनातत्रनाशइत्यादिग्रंथपर्यालोचन
यास्वल्पपटनाशस्य महापटहेतुत्वं लब्धं तथा च त्रितंतुरेत्वित्यादि रौधितिग्रंथासंग
तिः तत्र त्रितंतुकादिपटसत्वस्थितिकाले तदुत्पत्तिकाले च स्वल्पपटनाशरूपकारणा

भावेन महापटोत्पत्तिप्रसंगासंभवादित्याशंकानिरवकाशा। तन्नाशाद्दित्यादिग्रंथस्य प्रति
बंधकाभावात्मकद्रव्याभावहेतुत्वतात्पर्यकतया त्रितंतुकादिपटोत्पत्तिकाले तादृश
कारणसत्त्वेन महापटोत्पत्तिप्रसंगसंभवेन त्रिचतुरेत्यादिग्रंथसंगतेः। तार्किकच
क्रवर्तिनस्तु द्रव्यांतरे तंतुकपटोत्पत्तिपूर्वं नवतंतुकपटोत्पत्तिर्भवितव्येति सत्यं परंतु नवतंतु
कनाशे एव न द्रव्यांतरे तंतुकोत्पत्तिः तत्सत्त्वेपि तदुत्पत्तौ बाधकाभावात्। न तु द्रव्यस्य प्रति
बंधकस्य सत्त्वे कथं द्रव्यांतरोत्पत्तिरिति वाच्यं। न्यूनवृत्तिकद्रव्ये विद्यमाने व्याधिकदेशवृ
त्तिद्रव्योत्पादस्यानुभवसिद्धत्वेन द्रव्यत्वेन द्रव्यं प्रतिप्रतिबंधप्रतिबंधकभावस्याधि
करणवृत्तित्वविशिष्टसमवायस्यैव प्रतिबध्यतावच्छेदकसंबंधत्वकल्पनेनादोषा राम
दित्याहुः। विनिगमनाविरहेण नानाध्वंसानां प्रतिबंधकेऽगौरवाद्धत तन्नाशकेति। तत्र ३५
चलत्कर्मत्वावच्छिन्न एव चलत्त्वेन तत्कर्मत्वे नदीधितावुत्पत्तिप्रसंग इति तथा चलत्पा
तौ तंतुतत्संयोगादिरूपसमवायिकारणासमवायिकारणसत्त्वेन तत्पटप्रागभाव

सत्त्वेन च तत्पटोत्पत्तिप्रसंगवारणाय प्रागभावांगीकारेपि तावत्तंतूनां तत्तद्व्यक्तित्वेन हेतुत्व
स्यावश्यकत्वे तैरेव स्वानधिकरणे तंतुष्वपि तत्पटोत्पत्तिवारणसंभवे प्रागभावकल्पनं
निरर्थकमिति भावः। ननु तत्कार्याव्यवहितपूर्वक्षणावच्छेदेनैव तदधिकरणे तत्प्रागभा
वसंबंधोंगीक्रियते प्रतियोगिसमवायिपूर्वमेव तत्सत्त्वेपि काल एव प्रागभावो वर्तते
एवं च तदानीं तत्स्वप्रागभावस्य तत्रासत्त्वादेव न तंतुषु तत्पटोत्पत्तिप्रसंगवारणेन तावत्तंतू
नां तत्तद्व्यक्तित्वेन हेतुत्वस्यावश्यकत्वमिति प्रागभावकल्पनं सार्थकमेवेति चेदत्राहुः
। तथा सत्येककारणपरिशेषापत्तेर्जितं वेदांतिप्रभृतिभिः तत्रैवानाद्यवधिघटादिना
मकृत्वादिति प्रागभावस्य संबंधः प्रतियोगिपूर्वतत्समवायियावत्कालावच्छेदेनैव
तत्समवायिनि वाच्यः इत्युक्तापत्तिवारणाय तादृशहेतुत्वमावश्यकमेवेति कल्पनमपि
न प्रागभावप्रत्याशेति। न चैवमपि तत्पटोत्पत्तिप्रसंगवारणाय चरमतंतुव्यक्तेरे
व तद्व्यक्तित्वेन हेतुत्वमास्तां कृतमन्यतंतूनां तादृशहेतुतयेति वाच्यं। तत्पटस्य तावत्तं

३६ तुत्पत्तित्वनियमोपपत्त्येऽप्रदर्शितरीत्या प्रत्येकतत्तत्तंतुनिवेशपर्यन्तासामग्र्यास्तित्वस्वीकार
स्यावश्यकतया तन्निर्वाहाय तावत्तंतूनां साहित्यहेतुताया आवश्यकत्वात् । न चैवं चिवतु
३। रेष्विस्वाद्दिर्भ्रष्यस्य लाद्दशाहेतुतावश्यकत्वप्रतिपादकत्वानुपपत्तिरिति वाच्यं । तेन ग्रंथे
नप्रागभावस्यैप्रसंगावारकत्वप्रतिपादनेर्थतस्तदावश्यकत्वस्यापि प्रतिपादनात् शं
कते तावदिति । कतिपयेति लध्वाचयानदाश्रयविरहादेवनापत्तिरिति भावः । पावदा
श्रयविरहोऽकिं चित्कर इत्याशयेनाह । कार्यानुत्पादस्येति । नवीनास्तु कतिपयेति
। तथा च तावत्तं तुद्वृत्तित्वानुपपत्त्याभावत्तंतुवृत्तिपटोत्पादस्य त्रिचतुरादितंतुमात्रे राम
गु० बाधात् तुत्वं तुण त्वोत्कर्षे रैवोचितत्वेन कार्यानुत्पाद[illegible]स्यादित्यं न्यासामंजस्यात् । विनाकारण ३६
विरहं विनापटतत्स्पटकारणतावच्छेदकावच्छिन्नाभावं व्याख्यायां तदवच्छिन्नव्यतिरेकस्ये
ति । इदमुपलक्षणं । तत्पटकारणप्रागभावव्यतिरेकस्य चेत्यपि द्रष्टव्यं । कार्या
नुत्पादेऽनभ्युपगमं । कार्यानुत्पादप्रयोजकस्याभावं आपत्तिवारणाय पुनः शंकते

दीधितौ तत्त्वेनेति। व्याख्यायां तन्तूनामेवेति यावत्तंतुत्वेन जनकत्वासंभवादिति भावः।
अवच्छेदकतयैव कारणतावच्छेदकतयैव। एतावताऽपि कारणीभूतप्रागभावो न सिद्ध 5
एवेत्यत आह अवच्छेदकत्वेऽपीति कारणतावच्छेदकतया तत्सिद्धावपीत्यर्थः वेति अ
न्यपर्यकं कारणत्वमित्यनेतरं योज्यं तथा च कारणत्वमपि स्यादिति। लभ्यं। दीधितौ
परस्परासंपृक्तेष्विति। तावत्तंतुसूत्पन्नेष्वित्यादि व्याख्यायां असमवायिकारणस्ये
ति। दृष्टमुपलक्षणं असमवायिकारणानां तावत्तंतूनां सत्त्वेऽपीत्यपि बोध्यं। दीधितौ
तत्प्रागभावव्याप्येति तत्पटप्रागभाववदन्यावृत्तीत्यर्थः। तेनातीतानागता
नां च संयोगानां तत्पटपूर्वमसत्त्वेऽपि न दोषः तंतुसंयोगेषु तावत्तंतुमात्र
वृत्तिसंयोगेषु न तु कालिकतत्पटविशिष्टप्रागभावव्याप्यत्वनिवेशान्न दोषः अतीता
नागत ताद्दशसंयोगानामतथात्वादत आह व्याख्यायां तंतुमात्रवृत्तीनामेवेति स

भवानंदी

३७ वैषाम्यितिरोषः दैशिकस्तथेति। तथाच कालिकव्याप्यत्वनिवेशे तत्क्षणोत्पन्नकविद्यमानसं
37 योगानामप्यतथात्वेन दैशिकव्याप्यत्वमेव निवेश्यं तथा चातीतानागतसंयोगाना
मपि तथात्वेन नदीधितिसुक्ततत्क्षणानुत्पत्तिप्रसंगात् तादवस्थ्यमिति भावः। नचैवमिति अती
तानां विशेषणत्वेनानागतानां च विशेषणत्वे वारणादिति भावः। तत्क्षणेति। इदं च वि
शेषणं तत्क्षणसमानकालोत्पत्तिकस्य तत्तदनंतरकालवृत्तिसंयोगवारणाय। तत्क्षण
समनियतकालसंयोगवारणाय तत्क्षणानधिकरणमिति। तत्क्षणवृत्तिरिति इदं चाती
तसंयोगवारणाय वारणायापि। अपि नातीतवारणपरिष्कारः तत्क्षणिकत्वमिति। अ राम
न्यथा तादृशसंयोगव्यक्तेस्तत्क्षणजनकत्वे समवायिकारणनाशस्य द्रव्यनाशहेतु ३७
त्वेन तत्क्षणोत्पत्तिकाले तादृशसंयोगव्यक्तिनाशेन तत्र द्वितीयक्षणे तत्क्षणनाशाप
त्त्या तत्क्षणस्य क्षणिकत्वं स्यादिति भावः। संयोगविरहस्येति। तत्क्षणप्रागभावव्याप्य

संयोगविरहस्येत्यर्थः तेनद्वयतंतुनाशात् त्रितंतुकस्यनाशस्तंतुसंयोगस्योत्पत्तौ तत्वेपिनक्ष
तिः तस्यतत्पटप्रागभावाव्याप्यत्वात्। आहुरिति। अत्रस्थलविशेषपर्यंतानुशर
ण ऽकेशारवास्यरस्योवोध्यः। तत्वेनैव। तद्व्यक्तित्वेनेव। वारणायेति। एतत्कारणत्वसं
योगत्रयमात्रसत्वेतत्पटोत्पत्तिवारणायेतिवोध्यं। अतिगौरवादितिकारणतावा
च्छेदकगौरवस्याधिक्यादितिभावः। मान्यास्तुतन्तुपटनिष्ठतद्व्यक्तित्वंतत्पटएवतथा
चवितत्पटस्यतंतुयोगितासंबंधेनतत्पटवत्वेनैवप्रागभावविशेषेनगौरवमत
आहुयावत्वेतिशेषंपूर्ववदित्याहुः। नवीनास्तुतादृशयावत्तावच्छिन्नतादात्म्यस्यै
कदेशोऽसत्वेन कालिकसंबंधेनैवतद्धेतुत्वंवाच्यमितितिनस्वानधिकरणतंतुव्यापत्ति
वारणायमतः प्रागभावस्यविशेषणं तथाहेतुत्वेमावश्यकमतआह यावत्वेति। शे
षंपूर्ववदित्याहुस्तत्पटत्वंयावत्वाविशिष्टएवयावत्तादात्म्यस्यविद्यमानत्वात्। अन्य
थायावद्घटानयावद्घटाइत्यादिप्रतीत्यापत्तेः निमित्तस्यचेति चकारेणुक्तासमवायि

कारणैकत्वस्य ज्ञापकः इत्याचार्याः इति तथा च स्वानधिकरणे त्वो छि घुत्पत्तिवारणाय
प्रागभावस्य हेतुत्वमित्याशयः। वस्तुतस्तु एकघटादौ पर्याप्तिसंबंधेन छित्वाद्युत्पत्ति
वारणाय समवायिनां समवायिनां वा बहूनां तद्व्यक्तित्वेन हेतुत्वकल्पने गौरवमि
ति पर्याप्तिसंबंधेन छित्वादिकं प्रति पर्याप्तिसंबंधेन तत्प्रागभावस्य हेतुत्वं वक्तव्यं व्या
सज्यवृत्तिधर्मे प्रागभावस्यापि व्यासज्यवृत्तित्व स्वीकारात् दोष इत्येवाचार्याणां मा
शयः त्रित्वादेर्द्वित्वादिसामग्रीजन्यतया छित्वाद्यभेदापत्तिरित्याशंक्य छित्वस्य प्राग
भावो द्वित्वे त्रित्वस्य त्रित्वे हेतुरिति सामग्रीभेद इत्याचार्यैरुपदर्शितत्वात्। अत एव
दीधितौ छित्वाद्युत्पत्तिरित्येव पाठः न त्वस्येषामभिमतस्त्रित्वाद्युत्पत्तिरिति पाठ इति
ध्येयं। एतेनैतिविवृणोति तत्रापीति। परस्य तृतीयस्य दीधितौ व्याख्यातः प्राग
भावं विना अनुपपादितः। अत्र मैथिलाः उस्यत्र तत्त्वज्ञानस्यादृष्टोत्पादवारणा
याऽदृष्टत्वावच्छिन्नं प्रति अनंतमिथ्याज्ञानजन्यवासनानां तद्व्यक्तित्वेन हेतुत्वे गौ

स्वमिति लाघवाद्दृष्टत्वावच्छिन्नं प्रत्याघातत्वज्ञानप्रागभावत्वेन हेतुत्वं कल्प्यत इति प्राग
भावसिद्धिरावश्यकी न च तस्य सामान्यादितुल्यत्वसंभवेनाभाववत्वे मानाभाव इति
वाच्यं आरभ्यात्मनोः स्वं द्रव्यत्वं पुनः समवायैकार्थसमवायान्यतरसंबंधेन सत्ताव्याप्यत्वरूपभा
वत्वग्राहकप्रमाणाभावेन पूर्वोपदर्शितयैक्यलाघवेनादृष्टजनकतावच्छेदकतया
कारणीभूतवासनायामेवैकजातिकल्पनाया आवश्यकत्वात् न च पटुतरत्वजात्यासांक
र्यात्तत्र तस्य जातित्वं संभवतीति वाच्यं। तादृशजातौ मानाभावात्। न च पुनः पुनः
स्मरणमेव तत्र मानमिति वाच्यं। इदि दृढबोधकसम्यग्धानादेव पुनः पुनः स्मरणो
पपत्तेः अत्रेदं बोध्यं। यत्र क्रमेणैव सहस्रादितंतूनां तत्संयोगानां चोत्पत्तिस्तत्र
त्रिचतुरैस्त्रित्याद्युत्तरीत्या पूर्वतत्पटोत्पादद्वारसत्वाघसर्वव्यक्तीनां तत्तत्पटव्यक्तित्वेन
हेतुत्वस्यावश्यकतया तेनैव देशनियमोपपत्तौ प्रागभावसिद्धेरसंभवेपि यत्र
युगपदेव सकलतंतूनां तत्संयोगानां चोत्पत्तिस्ततः पटोत्पत्तिस्तत्र प्रागभाव

म०नं०टी०

३९ 39 हेतुत्वे न तद्धटितसामग्र्या अप्यंगीकारे एव देशनियमोपपत्तेः सर्वव्यक्तीनां तद्व्यक्तित्वे
न हेतुत्वमनावश्यकमिति तत्र प्रागभावसिद्धिर्दुर्वारा। यत्तु तत्र तावद्व्यक्तिसंख्यातिशे
षहेतुतये वातिप्रसंगवारणं संभवतीति किं प्रागभावेनेति नवीनैरुक्तं। तत्र समी
चीनं एतदपि बहूनां तंतूनां युगपदुत्पन्नानां नाशसंयोगादुत्पन्नपटस्य नानासंयोगना
शान्नष्टस्य पुनस्तेषामेव तंतूनां संयोगांतरात्पटांतरोत्पत्तिकाले पुनरुत्पादवारणाय
प्रागभावसिद्धेरावश्यकत्वात् द्वितीयेऽस्यापि बुद्धिव्यंग्यत्वपक्षे नवीनमते तत्पटोत्पा
दकसंख्याविशेषस्य तदानीमप्यनपायात् तत्तत्कार्यतावच्छिन्नसंख्याविशेषस्य हे राम
तुत्वे वातिगेतेरवात्। किंच संख्यायां पुरुषभेदेन नानात्वेन विनिगमनाविरहेण तं ३९
तत्संख्याविशेषहेतुतापेक्षया एकस्याः कार्यतावच्छिन्नप्रागभावहेतुतायाः कल्पनस्यैवो
चितमिति प्रागभावसिद्धिर्दुर्वारणापि दुरपवादा। दीधितिकाराणामप्ययमेवाश
यः स्फुटीयते अन्यथा तेषामेकदेशिनो वर्णयंतीत्यनेनास्वरसोद्भावनानुपपत्तेः केचित्तु।

अतिरिक्तागंतस्वत्वस्वीकारे तदुत्पत्तिविनाशकत्वेनैव गौरवमिति निष्क्रयादिप्रागभावविशि
ष्टक्रयादिध्वंसस्यैव स्वत्वरूपतांगीक्रियते लाघवादिति प्रागभावसिद्धिः एवं पित्रादी
म३ नां मरणादिनैव पातित्यादिनापि तदीयधने तेषां स्वत्वेन स्यपत्ति तत्पुत्रादीनामुत्पद्य
त इति स्मरति सिद्धं तथा च पतितेन प्रायश्चित्तानुष्ठानेपि पूर्वार्जितधने क्रयादिकं विना
धिकारो न स्यात् स्वत्वोत्पादकाभावादिति प्रायश्चित्तप्रागभावविरहविशिष्टपातित्य
स्यैव स्वत्वनाशकत्वमुपेयमिति प्रागभावसिद्धिरावश्यकी स्यात् अधिकमन्यत्रम
तू तो द्रष्टव्यमिति संक्षेपः प्रागभावस्येति। न च प्रतियोगिसंनिकर्षत्वेन निरोधः। उ
र्दर्पंतीति प्रत्यक्षेण प्रागभावसिद्धावपि कारणतया संमतप्रागभावसिद्ध्यर्थं
वर्णितं आरब्धायां पुनरुत्पत्त्यापत्तीति। न च क्रियायाः कार्यसत्त्वेहभावेन हेतुत्वा नैवा
पत्तिरिति वाच्यं। तथा सति हेतुतायां कार्यकालीनत्वाभावेन अपि निवेशेन गौरव
स्य दुर्वारत्वात्। तथापि संयोगजसंयोगस्योत्पत्त्यापत्तेर्दुर्वारत्वाच्च। संयोगास्वं

भवानंदीटी०
४०
॥

ताभावइत्युक्तमनियतपूर्ववर्तिताकइत्यादिः हेतुर्वाध्यइति। अत्रावछेदकतासंबंधेनसंयोगं
प्रतितेनसंबंधेनसंयोगात्यंताभावस्य हेतुत्वं वोध्यं। प्रादेशिकत्वेति देशविशेषावछि
न्नत्वे त्यर्थः एवमग्रेपि। शाखादेरिति उक्तमनियतपूर्ववर्तिताकेत्यादि। अवछेदकतासंबंधे
नेति तृतीयार्थोऽवछिन्नत्वंकार्यतानिरूपकत्वरूपहेतुत्वेकदेशकार्यतान्वयि। वाध्यमि
ति। अत्रावछेदकतासंबंधेन सत्वेत्यर्थः न च स्त्रोमूलनादिपरः उभयेति संयोगात्यंताभा
वशाखाद्यवछेदकोभयेत्यर्थहेतुत्वापेक्षया। अनन्यथासिद्धत्वघटककल्पनापेक्षया
। प्रागभावस्येति उक्तमनियतपूर्ववर्तिताकस्येत्यादि। हेतुत्वं अन्यथासिद्धत्वमात्रंतत राम
स्यच प्रागभावस्य च स्वावछेदकावछेदेन। अवछेदकताघटितसामानाधिकरण्य ४०
संबंधेन। स्यादिति। तथा चोक्तरीत्यालाघवात्प्रागभावसिद्धिर्नस्यादिति भावः शाखा
वछेदेनेति। उत्पद्यमानसंयोगस्यशाखावछिन्नत्वेनियामकाभावादित्यर्थः यथा
श्रुतेक्रियासंयोगयोः समवायमंतर्भाव्यैवहेतुहेतुमद्भावेनासंगत्यापत्तेः। तदवछेदेन

शाखावच्छेदेनप्रादेशिकत्वेति।तथाचतादृशक्रियायानिरुक्तजनकत्वेनैवसंयोगस्यप्रादेशिकत्वनिय
मोपपन्नोकिंतदुपपादकतयाप्रागभावकल्पनेनेतिभावः।अभावेनेतिनिरुक्तजनकत्वासंभवे
नेतिशेषः।तत्क्रियाव्यक्तेरेवेति।एवकारस्तत्त्वेनेत्यनंतरंयोज्यः।तथाचतत्क्रियायास्तत्त्वेनैवेत्यर्थः।
एवकारेणनिरुक्तजनकत्वव्यवच्छेदः।हेतुतयाहेतुत्वस्यवक्तुंशक्यतयाप्रागभावाभावादेवेतितथा
चनिरुक्तजनकत्वस्यासिद्धतयाप्रादेशिकत्वनियामकत्वासंभवेनप्रागभावस्यतन्नियामकतयाक
ल्पनमावश्यकमितिभावः।नन्वेवमपिमूलाभिमुखक्रियातःशाखावच्छिन्नसंयोगोत्पादोदुर्वा
रः।तस्याएवतद्व्यक्तित्वेनतत्रहेतुत्वसंभवादतआहशाखेति।क्रियांतरस्यशाखाभिमुखक्रिया
व्यक्तेः।तज्जशाखावच्छिन्नसंयोगे।तत्त्वेन।तद्व्यक्तित्वेन।हेतुत्वादितिफलानुरोधित्वात्कल्प
नायाइतिभावः।लीलावतीकारेतितस्यचायमाशयः।लाघवादवच्छेदकमनंतर्भाव्यैवप्रति
योग्यभाववयोर्विरोधः।मूलेवृक्षेनकपिसंयोगइत्यादिप्रतीतीनांचवृक्षनिष्ठकपिसंयोगाद्य
वच्छेदकत्वाभावोमूलादिनिष्ठोविषयइति।अव्याप्यवृत्तीतिनचसिद्धसाध्यसिद्धिव्याघातःउक्तविरो

धेनार्थ तस्तन्निरासइत्याशयात्। नवीनास्तु सामग्र्युत्तरक्षणः कार्याधिकरणमित्येवं नियमो न तु
त्पत्स्पंतर्भावेऽपि तेन संयोगादिस्थले पुनरुत्पत्त्यापत्तिरत आह धारावहनेतीत्याहुस्तच्चिंत्यं
ज्ञानस्याप्यव्याप्यवृत्तितया धारावहनस्थले चैत्यस्यासामंजस्यात्। धारावहनेत्यस्य पूर्वसंव्या
प्यवृत्तिविशेषेति पूरणे च तस्यैवाधिक्यात्। तस्येवेति। अन्यथा धारावाहिकत्वस्यैवानुप
पन्नेरितिभावः। दीधितौ प्राथमिकेति प्रथमोत्पन्नेत्यर्थः इदं च स्वरूपकथनमात्रमिति बहवः
संपातायातमित्यन्ये। आंशिकनिर्विकल्पकपदं ज्ञानपरमिति मान्याः व्याख्यायां पूर्वत्र प्रथमे
द्वितीये च क्षणे विशेषणस्य निर्विकल्पकाव्यवहितपूर्वक्षणस्य एककारेणेति। कारणं तत्रानु
पन्नमेव्यतिप्रसंगाभावादितिभावः तथात्वं अतीन्द्रियत्वं। प्रत्यक्षेति प्रागभावप्रत्यक्षेत्य 
र्थः तस्य प्रागभावस्य। संबंधितावच्छेदके त्विनिर्विकल्पकत्वे ~~सव [illegible] कात्वविशिष्ट [illegible]~~
~~प्रत्यक्षस्यात्मकत्वविरहेऽपि तेन ज्ञानेन [illegible] स्थले भावत्वे [illegible] निर्विकल्पककालस्पर्शान्तमा~~
~~ना स्मात्कर्यंतानाह [illegible] ज्ञानत्वादिमान्वयग्रह इत्याशंकानवकाशः सामान्यलक्षणानंगीकर्तृवि~~

स्यर्थः। ज्ञानप्रागभाववत्त्वादीति। आदिना अस्य स्वप्रागभाववत्त्वपरिग्रहः। दीधितौ एकेति। अवच्छेदकत्वादि
संबंधेनेत्यर्थः। आदिना तादात्म्यपरिग्रहः। कार्याभावस्येति। शाखाद्यवच्छेदकस्य चाव्याप्यवृत्ति
प्रतियोगिकनिर्विकल्पकं प्रति चेति शेषः। उत्तरेति कार्याभावस्य शरीराद्यवच्छेदकस्य चेति
शेषः। उत्तरेत्यस्य निर्विकल्पकोत्तरेत्यर्थः। व्याख्यानां पंचमस्येति निर्विकल्पकोत्तरज्ञानस्य नाशा
दिति भावः। उत्तरत्वं स्वध्वंसविशिष्टत्वमित्याशयेनाह ध्वंसोऽवच्छिन्नेति त्वाद्यवाहात ताद्दशेति प्राथ
मिकनिर्विकल्पकेत्यर्थः। शाखादेरिति संयोगप्रादेशिकत्वनियमायेति शेषः। ननु प्रागभावप्रा
देशिकत्वे मानाभावेन कथं प्रागभावस्य संयोगप्रादेशिकत्वनियामकत्वम् अत आह। दीधितौ
तत्स्वाभावाधीनाह्नेति प्रागभावस्वभावाधीनाह्नेत्यर्थः। इतराश्रयोऽव्याहतेति यावत्। तत्प्रा
देशिकत्वात् प्रागभावस्य प्रादेशिकत्वात्। अजन्यस्याधिकरणत्वादिवत्प्रादेशिकत्वमपी
तराश्रयोऽप्यमेवेत्याशयः। व्याख्यायां अतिरिक्तप्रागभावेति। एतस्य हेतुत्वे च विनिगमना
विरहः। धर्मिग्राहकमानसिद्धत्वस्यैव विनिगमकत्वादित्याशयः। पूर्वोपदर्शितरीत्या। ऽ

४२ भावत्वेमानंस्तु चरमेवेत्यत आह इत्यादिकमिति प्रागभाववत्संयोगादीनामपि स्वभावा
देव प्रादेशिकत्वनियमोपपत्तिरिति भावः। द्विसमवायिकारणकस्य त्वेकस्यासमवायि
कारणसंयोगस्य तत्त्वेन हेतुत्वादेव तदुत्पादे नियमसंभवात् आह बहुसमवायिकारणकेति।
चरमतंतुसंयोगस्य तत्त्वेन हेतुत्वे दशांशतंतुत्वे दशांशतंतुकपटादेः स्वाश्रयतावच्छेदकतंतुवृत्तित्वानुपप
त्तेराह संख्याविशेषस्येति। इत्थं च संख्याविशेषस्य ध्वंसोत्पादनियामकत्वे च तत्र श्रण इति।
एतस्यासंख्येत्यादावन्वयः। असमवायिकारणेति तंतत्पन्निश्चयणयादिः चरमतंतुगतैकत्वे
त्यर्थः। तादृशेति। चतुर्थक्षणे इत्यादि। दीधितौ संभवे पीति पूर्वोपदर्शितरीत्या संख्याविशेषस्य
नियामकत्वासंभव इत्यस्वरसोपि नास्त्यूचितः व्याख्यायां कारणत्वे नैवेति। तथा च वक्ष्यमा राम
णरीत्यादि द्वित्वस्यैव स्पलइबलाघवासंभवेन प्रागभावनसिद्धौ दितिभावः। आवश्यकत्व इति आ ४२
चलिनिगमनाविरहेण नेक द्वित्वानां विशेषतो हेतुत्वापत्तेगौरवमेवास्वरसः केचित्तु प्र
थमद्वितीययोः द्वितीयतृतीययोश्च द्वित्वं त्रित्वासमवायि इति मते सर्वसमवायि यत्किं

श्चेद समवायिसत्त्वेऽस्यासमवाय्यनुत्पादः स्यादशायां प्रथमोत्पन्नगतेत्यादेश्चरमोत्पन्नगतैक
त्वस्य च सत्त्वेनानयोर्वैशिष्ट्यकारणत्वेपि तद्गतसमवायिनां तत्तद्व्यक्तित्वेन हेतुत्वस्यावश्य
कतया तादृशकारणत्वमानाभाव इत्यस्वरसो बोध्यः इत्याहुः इति निगमनाविरहेपीति । त
थाचैवं त्रित्वस्थलेपि तावद्व्याभावानां प्रागभावसिद्धिरिति भावः । कल्पनात्रयस्य पूर्वोक्त
धर्माविकल्पनात्रयस्य तत्र त्रित्वादेरेकस्यापत्तेरिति । तथा च तस्याः सर्वत्राविशेषेण सत्त्वा
दतिप्रसंग एवेति भावः । एकत्वद्वयमात्रेतिमात्रपदेन तृतीयैकत्वव्यवच्छेदः द्वयोर्द्वि
त्वज्ञाने एकत्वद्वयमात्रज्ञानेपि त्रित्वाद्यनुत्पादाद्विवादग्रस्तः । द्वित्वज्ञानसहकृतैकत्वज्ञा
नादेस्त्रित्वाद्युत्पादकत्वमतेन त्रित्वाद्युत्पादादत आह द्वित्वाज्ञानेति तदेकत्वद्वयेति । त
दितिज्ञानविशेषणं यस्मिन्नेकत्वद्वयज्ञाने तृतीयैकत्वमपि विषयस्तज्ज्ञानगततद्व्यक्तित्वे
नेत्यर्थः । त्रित्वंप्रतीति अयमाशयः सामान्यतो व्यासज्यवृत्तिसंख्यायामपेक्षाबुद्धिर्हेतुः
अपेक्षात्वं च नानैकत्वावगाहित्वं नानात्वं चानुगतानतिप्रसक्तं द्वित्वाद्यन्यतमत्वं वैचमि

भवा०टी०

८३ त्ति एकत्वद्वयज्ञानत्वेन हेतुत्वं फलितं । त्रित्वादिस्थलेप्येकत्वद्वयज्ञानत्वान्न व्यभिचारः एवं
83 चोक्तः परिहारस्तथ त्रित्वादौ तृतीयैकत्वावगाह्येकत्वद्वयज्ञानत्वादिना हेतुत्वे यत्सामाना
योरिति न्यायेन तत्त्रित्वं प्रतिनिरुक्तरूपतज्ज्ञानस्य तद्व्यक्तित्वेन हेतुत्वमावश्यकं । न च त्रित्वा
द्येकत्वत्रयज्ञानत्वादिनैव कारणत्वं सम्यक् गृहीतसामान्यकारणतावच्छेदकस्यैव रूपान्त
रमंतर्भाव्य कारणतावच्छेदकतया निर्वाहे तत्त्यागानौचित्यादिति । तादृशेति निरुक्त तज्ज्ञा
नेत्यर्थः एवमग्रेपि । अपेक्षाबुद्धेः ईश्वरयोगिनोरपेक्षाबुद्धेः तथाकारणत्वेति विनिगम
नाविरहेण तत्त्वेन कारणताद्वयेत्यर्थः त्रित्वादेः पूर्वं त्रित्वादेरसत्त्वेन विशेषणत्वासंभवा राम
दाह उपलक्षणीभूयेति । स्वस्यस्वजनकतावच्छेदकत्वानंगीकारे त्वाह त्रित्वाद्याश्रयेति अ ८३
खंडोपाध्यतिरिक्तस्यान्यतमत्वस्य स्वरूपतोवच्छेदकत्वासंभवादाह तत्प्रागभावेति । तत्त्वे
न तद्व्यक्तित्वेन । नित्येति पुनः पदद्वयमत्रस्याप्युपलक्षकं । मिश्रोक्तां सामान्यलक्षणां युक्तिं
दूषयितुं तन्मतमुपन्यस्यति सौधितेयत्त्विति । ज्ञानेति ज्ञानेच्छयोरिच्छाकृत्योर्ज्ञानकृत्यो

श्चेत्यर्थः ।। विनेति संभवतीति शेषः तदुपस्थितिं विना फलोपधायकतत्तद्व्यक्तिघटितान्वयव्यति
रेकग्रहासंभवेन तेषां कार्यकारणभावग्रहासंभवादिति भावः योग्येति न च योग्यत्वं लौकि
कप्रत्यक्षविषयत्वं तथा च निर्विकल्पकासंग्रह इति वाच्यं भावनादेरु जीवनयोनियत्नादे
त्वस्यैव योग्यतापदार्थत्वात् आत्मनिसंयोगादीनां यौगपद्यसत्वाद्विशेषगुणेति विभु
स्याकाशे शब्दयौगपद्यसत्वादात्मनीति । अत्र वदंति योग्यविशेषगुणत्वं जीवनयोनियत्ने
तरयत्नासमवेतत्वे सति लौकिकमानसप्रत्यक्षाकारविषयिणी या जातिस्तद्वत्त्वं तथा च ता
दृशजातिमत्तो ये गुणास्तेषामात्मनि यौगपद्याभावनियमे तात्पर्यं तेन न निर्विकल्पक
द्वययौगपद्यसंभवे तद्विशेषणेन च ज्ञानादे जीवनयोनियत्नस्य च यौगपद्येऽपि न क्षतिः
जीवनयोनियत्नत्वं च तन्मात्रवृत्तिजातिविशेष इति । युगपत्स्वस्वरूपयौगपद्यनिषेधस्या
त्मयोग्यविशेषगुणेऽसंभवादाह यद्वा स्वाश्रयं यौगपद्यमिति व्यक्तीति तत्तद्व्यक्तित्वावच्छिन्नेत्य
र्थः यत्सत्त्वमिति यौगपद्यघटितस्येत्यादिः सामान्यलक्षणेति तथा ज्ञानत्वादिना तज्ज्ञाना

छुपस्थापनेपि तच्छक्तित्वावच्छिन्नघटितपौर्वापर्यज्ञानासंभवादिति भावः दीधितौ पौर्वापर्येति
तन्नज्ञाने छाकृतीनां तच्छक्तित्वावच्छिन्नघटितासमवहितपौर्वापर्याग्रह इत्यर्थः एवमग्रे
पि आख्यायां ज्ञाने छेति स्वरूपयोग्यस्य ग्रहादेवेत्यादि नियतव्यतिरेकेति पौर्वापर्याघटित
नियतव्यतिरेकमात्रेत्यर्थः कार्यकारणेति स्वरूपयोग्य एव सामान्यतः इत्यादि आवश्येति।
सामान्यलक्षणवादिनापीत्यादिः अभ्युपेयेति अन्वयग्रहस्यापि कारणताग्राहकत्वमभ्यु
पेयमित्यर्थः। वस्तुतस्तु उक्तरीत्या तस्य प्रयोजनाभाव इति भावः इच्छात्वविशिष्टेति इदमुपलक्ष
णं ज्ञाने छात्वले ज्ञानत्वविशिष्टोपनीतभाने छात्वविशिष्टत्वोदिकप्रत्यक्षात्मकस्योत्पत्तिस
ख्यं तेन ज्ञाने छात्वले ज्ञानत्वेन छात्वनिर्विकल्पककाल एव ज्ञाननाशात्कथं तादृशज्ञान
त्वादिनान्वयग्रह इत्याशंकानवकाशः सामान्यलक्षणानंगीकर्त्रा विशेषणज्ञानहेतुत्वा राम
नंगीकारेण निर्विकल्पकापेक्ष्यैवनेत्याशयेनाह। विशिष्टेति। पूर्वं सामान्यलक्षणापूर्वप ४४
क्षग्रंथे खंडितमिति सामान्यलक्षणानंगीकर्त्रेत्यादि। विशेष्ये विशेषणमिति इच्छात्वप्र

कारकगुणत्वाभावेन तदंशे विशिष्टवैशिष्ट्यबोधरूपत्वासंभवादिति भावः। इति मते। इति
सिद्धान्ते। प्रकारान्तरेण। कृत्यनुत्पादः इत्याद्युक्तप्रकारेण। अन्वयमात्रेति मात्रपदेन
पौर्वापर्यव्यवच्छेदः तद्ग्रहस्य चानुमानादिनेवेति भावः। दीधितौ साक्षात्कारस्येति
विषयस्य च पूर्ववर्त्तितयैव हेतुत्वं तेन नेच्छाद्युत्पत्त्यनन्तरं ज्ञानादिनाशेऽपि न क्षतिरिति
भावः। कृत्युपधायिकायेच्छा तदुपधायकज्ञानस्याप्यन्वयग्रहमाह स्मरणेनेति व्याख्या
यां ज्ञानयोरेवेति चाक्षुषादौ चक्षुर्मनोयोगादेर्हेतुतया तासत्त्वादिक्षणे चाक्षुषा
द्युत्पत्तिर्भवते इच्छादिकाले च तदुत्पत्तिरिष्यत एव बाधकाभावात् अत एव ज्ञाना
यौगपद्याकं मन इति सूत्रे ज्ञानयोर्यौगपद्यनिषेधस्संगच्छते योग्यविशेष
गुणयौगपद्यस्यानिषेधे च मानाभावः एतेन यावद्देहमात्मशिरस्सुखमित्या
नुभवेन तादृशनिषेधस्यैकावच्छेदपरत्वमाननानां गुणत्वावच्छेदेन यौगपद्यशालित्व
यत्नोपगमेऽपि ज्ञानेच्छायौगपद्यमसंभवीति युगपद्विंशतीत्यादिदीधितिरसंगता

त्तिनिरस्तमित्याशयः द्विंशत्येतीति । अत्रप्रत्यवतिष्ठंते वहवः विंशत्यंगुल्यवच्छेदेन युगप
द्विंशतिकृतीनामुत्पादे मानाभावेन कथं तद्दृष्टांतीकृत्य ज्ञानेच्छादीनां योगपद्यं स्वी
क्रियते । अथ एककर्तृविजातीयनानाचेष्टान्यथानुपपत्त्या विजातीयकृतीनामेकत्रो
त्पत्तिरवश्यं स्वीकार्या अन्यथैककृतेर्विजातीयनानाचेष्टाजनकत्वे पत्तऽ अवच्छेदकतासं
बंधेनैकांगुल्यां यादृशाकृतिवशात् समवायसंबंधेन यादृशी चेष्टा भवति तादृशाकृतेर
न्यांगुल्यामप्यवच्छेदकतासंबंधेन सत्त्वात् कथं नान्यांगुल्यां तादृशी चेष्टा भवतीत्याप
त्ति वारणाय विजातीयनानाकृतीनामेव विजातीयनानाचेष्टाजनकत्वमुपेयं एवं च वि
जातीयनानाकृतीनां योगपद्यास्वीकारे कथमेककर्तृनानाचेष्टोत्पत्तिरित्यन्यथानुपप
त्त्या नानाकृतीनां योगपद्यं स्वीकारणीयमिति चेन्न एककर्तृविजातीयचेष्टानामेककृति 
तः स्वीकारेप्युक्तापत्तेरसंभवात् । तथाहि समवायसंबंधेन विजातीयेतच्चेष्टां प्रति 
स्वीयविजातीयेतच्चेष्टावृत्तिसाध्यताख्यविषयतानिरूपितोपादानत्वाख्यविषयता

निरूपितोपादानत्वाख्यविषयतासंबंधेनकृतेर्हेतुत्वंस्वीक्रियतेतथाचपरेतदंगुल्यांविजा
तीयाचेष्टातदंगुल्यांविजातीयाचेष्टाइतिनानांगुल्युपादानकनानाचेष्टासाधकाए
काकृतिर्जातानतदेकांगुल्यवच्छेदेनयादृशीचेष्टाजायतेसानान्यांगुल्यवच्छेदेनजाय
तेतदंगुल्यांतादृशचेष्टावृत्तिसाध्यत्वाख्यविषयतानिरूपितोपादानत्वाख्यविषयत्वा
भावात्तननतदंगुल्यवच्छेदेनतेनसंबंधेनकृतेरसत्वमितिनोक्तापत्तिः।यत्तुएककृतिनानाकृ
तिस्वीकारेलाघवसंभवात्सएवसम्यक्तथाहिउक्तसंबंधेनकृतेर्हेतुत्वस्वीकारेपरेत
त्पुरुषीयांगुलीचेष्टाविषयिणीपुरुषांतरीयकृतिरस्तितदाकथंनतत्पुरुषस्यस्वांगुल्य
वच्छेदेनचेष्टोत्पद्यतइतितद्वारणायतत्पुरुषीयत्वमवश्यंनिवेश्यमितिगौरवंमन्म
तेचनानाकृतिस्वीकारेसमवायसंबंधेनचेष्टांप्रतिअवच्छेदकतासंबंधेनकृतेर्हेतु
त्वेएकपुरुषीयकृतेर्नान्यपुरुषीयांगुल्यामवच्छेदकत्वंस्वीक्रियतइतिनतत्पुरुषीयत्व
निवेशःतथाचतन्निवेश्यकार्यकारणभावकल्पनेमहल्लाघवमितितत्सत्।समा

भक्ता.नं.टी०
४६ व्यवच्छेदकतानिरूक्तोपादानतोभयसंबंधेनकृतेर्हेतुत्वोपगमेनतत्पुरुषीयत्वनिवेशाभावा
५६ त्।एकपुरुषीयांगुल्याअन्यपुरुषीयकृतेरनवच्छेदकत्वात्परंतुभवन्मतएवानंतचेजा
त्यतदवच्छिन्ननियामककल्पनेनमहद्गौरवमित्येककृत्यानानाकृतिस्वीकारोनसमीचीनइति
।अत्रोच्यते।एककृतितोनानाचेष्टास्वीकारेतच्चेष्टांप्रतिकृतेःतादृशोभयसंबंधेनहेतुत्वं
स्वीकरणीयमितितिभवन्मतेकारणतावच्छेदकसंबंधाधिक्यंएककृत्यानानाकृतिस्वीकारेतु
अवच्छेदकतेवकारणतावच्छेदकसंबंधइतिलाघवंतथाचेतादृशलाघवेनसमवायसं
बंधेनचेष्टांप्रत्यवच्छेदकतासंबंधेनकृतेर्हेतुत्वेसिद्धेयच्चापादानंविवारणायविजातीयचे
ष्टाजनकत्वेनविजातीयनानाकृतीनांतद्भिन्नजातीनांतदवच्छिन्ननियामकानांचकल्पना राम
गौरवस्योत्तरकालिकत्वेनफलमुखतयाअदोषत्वादिति।अत्रेदमवधेयम्।नानाचे ४६
ष्टासाध्यकसमूहालंवनात्मकैककृतिजातीयप्रयत्नादेवयुगपद्बहुविधविजातीय
चेष्टोत्पादसंभवेनयुगपद्विजातीयबहुविधचेष्टान्यथानुपपत्त्यायुगपद्बहुविधप्र

यत्नोत्पादस्वीकारो निरर्थक एव ननु समवायसंबंधेन चेष्टानिष्ठतत्तद्देशावच्छिन्नं प्रति ता
दृशकृतेर्नावच्छेदकतासंबंधेन कृतित्वेन हेतुता तादृशकृतेस्तेन संबंधेन विशिष्यांगुली
षु सत्वेन तत्तद्देशावच्छिन्नस्य देशविशेषोत्पादनियामकत्वानुपपत्तेः न चोपदर्शितरी
त्या समवायसंबंधेन चेष्टानिष्ठतत्तद्देशावच्छिन्नं प्रति तत्तद्देशावच्छिन्ननिष्ठसाध्य
त्वाख्यविषयतानिरूपितोपादानत्वाख्यविषयतासंबंधेन विजातीयकृतित्वेन हेतु
त्वान्नैष दोष इति वाच्यं। एतदंगुल्यां विजातीयचेष्टोत्पादाकारकवित्संवादिप्रयत्नाद
पि विजातीयकृतित्वेन हेतुत्वान्नैष दोष इति चेष्टोत्पादापत्तेरिति मैवं। तत्तदंगुलीवृत्ति
संयोगाद्यनुकूलदेशविषयातत्तदंगुल्या देहेतुत्वे कल्प्यमाने तत्रैव लाघवात्तत्तदंगु
ली समवेतत्वावच्छिन्नं प्रति तत्तदंगुलीत्वेन हेतुत्वं कल्प्यते तथा च वस्तुगत्या यस्या
मंगुल्यां पदे ज्ञात्वविशिष्टचेष्टोत्पादे तदंगुलीयसदकृतस्य तादृशासंबंधेन प्रयत्न
स्य नियामकत्वान्न दोषः न चैतदंगुल्यां विजातीयचेष्टोत्पादकारकपुरुषांतरीयांगुली

भवानं·सी०
४१ विषयकपुरुषांतरीयप्रयत्नादपि विजातीयचेष्टोत्पादप्रसंगः तत्र तत्पुरुषीयत्वादेः प्रय
।त्नादेर्वा तस्यामंगुल्यां विजातीयचेष्टोत्पादेन तत्र तस्या अप्यंगुल्याः सहकारित्वादिति
47 वाच्यं । उपदर्शितरीत्योपादानत्वाख्यविषयत्वावच्छेदकत्वोभयसंबंधेन प्रयत्नस्य हेतु
त्वकल्पनेनान्यपुरुषीयकृतेरन्यपुरुषीयांगुल्यामवच्छेदकत्वाभावेनोक्तदोषाभावात् ।
न चैवं गौरवं युगपद्विंशतिप्रयत्नोत्पादस्वीकारे वच्छेदकतासंबंधेनैव कृतेर्हेतुत्वकल्प
नेलाघवमिति वाच्यं । एककाले बहुविधप्रयत्नस्वीकारे तेषां तत्तदंगुल्यवच्छेद्यतानिया
मककार्यकारणभावकल्पनेनैव भवन्मतेऽपि गौरवात् । एवं तत्तद्विजातीयचेष्टानिर्वा राम
हक तत्तत्प्रयत्नो नानाजातीयोऽवश्यं कल्प्याः अन्यथा तत्तद्विजातीयचेष्टानीनामुत्पादस्य ४१
देशविशेषे किंचित्कारणनियम्यत्वादित्यपि गौरवं भवन्मतेऽपि किंच तत्तज्जात्यावच्छिन्न
प्रयत्ननियामककल्पनेन प्रत्यक्षादेः प्रवृत्तिसामग्र्याः प्रतिबंधकत्वस्य सर्वसिद्धत
या तत्तन्नियामकघटिततत्तद्विजातीयप्रयत्नसामग्र्याः प्रत्यक्षादेः प्रतिबंधकता कृ

च्छासमानाश्रयत्वांगीकर्त्तमते गौरवं दुरुद्धरमेव । न चैतत्गौरवं फलमुखत्वान्न दोष इत्युक्त
मेवेति वाच्यं नानाव्यक्तिकल्पनास्थले फलमुखगौरवस्यापि दोषत्वाया अभ्युपगम्यव्यवस्था
पनात् तस्मात् युगपद्विंशतिप्रयत्नोत्पाद्य वह्नितिय छ्मी दीधितिकृतो लिखनं तत्सुधीभि
र्विभावनीयमेवेत्यलं विस्तरेण । आवश्यकत्वादिति तार्किकचक्रवर्तिनस्तु समवायावच्छि
न्नप्रतियोगितावच्छेदकताकगोनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपमेव गो
त्वं विवक्षितं न तु प्रतियोगिवैयधिकरण्यघटितोक्तरूपं गौरवात् । एवं चासमवेतस्यमे
यत्वादेरपि व्यधिकरणस्तु समवायावच्छिन्नप्रतियोगितावच्छेदकताकगोनिष्ठान्योन्या
भावप्रतियोगितावच्छेदकतया तमादाय व्यभिचारानवकाशेन सम वेतत्वमनुपादे
यमेवेति प्राहुः नैयायिकः शंकते दीधितौ स्यादित्ति प्रयोजकत्वे इति रजताद्दीच्छायां
तज्ज्ञानहेतुतायाघटकत्वे इत्यर्थः । न च रजताद्दीच्छायां तद्धर्मिकेष्टसाधनताज्ञान
त्वादिने च्छायाहेतुताया आवश्यकत्वे स्यात् तं त्रैलोक्य हेतुतायामेव मानाभावइति

भवानं॰टी॰ ५८ वाच्यं। रजतादिज्ञानाज्ञानयोस्तत्तदिच्छातद्विरहाभ्यांतदिच्छाविरहे तज्ज्ञानाभावस्यैव
लाघवेन प्रयोजकतयाचोक्तहेतुतायाआवश्यकत्वस्याशयात्। एतदाशयेनैववक्ष्य
तिसामान्यतस्त्वेत्यादिव्याख्यायांभावइतिनियमोनस्यादितस्यभावइत्यर्थः अन्यथा
ख्यातस्यनंगीकर्त्तुमतेइतितदंगीकर्तुमतेतुलाघवेनतत्प्रकारकग्रहविषयत्वमेवनिया
मकइमितिभावः संभवतीतिप्रमेयत्वादिनोपस्थितेस्तादृशव्यवहारजनकत्वाभावादि
तिभावः तद्यावर्त्तनायेति। तद्व्यावर्त्तनेत्वनागतेच्छाविषयोपस्थि त्यर्थसामान्यत इत्यस्या
वश्यकीतिभावः। विशेष्यविशेषणभावेविनिगमनाविरहादाह रजतत्वप्रकारकज्ञान
त्वेनचेतिकारणतावच्छेदकस्यावश्यकत्वेप्यवच्छेदकलाघवमस्त्येवेत्यतआह। किंचेति। राम ५८
प्रसं॰ ३ वाच्येति आद्यादिति [redacted] गवारणायसामानाधिकरण्यंद्वितीयातिप्रसंगवारणायसमा
नविशेष्यत्वंग्रस्यासत्तिः तथाचकालिकोव्यापकतासम्बन्धेनव्यापकताविशेष्यतया
चव्यापकत्वेककारणतायामेवविनि छेति नास्तिप्रसंगइतिभावः प्रकारविशेष्ययोर्न्य

न्नाधिकभावस्यासर्वज्ञत्वव्यभिचारित्वादत आह किंचेति। प्रमेयत्वादिनेति ज्ञाने इच्छायां चान्वेति। अ
संसर्गाग्रहादेरित्यस्य प्रकारांतरेणावतारणं वदतो मतमाह। यत्त्विति तेनान्यादिति अतआ
ह असंसर्गाग्रहादेरितीति शेषः रजतत्वप्रकारतेति इदं च विषयतायाविशेषरूपेणापि
संबंधत्वमित्यभ्युपेत्याय वा विषयताविशेषस्य संबंधत्वमात्रमभिप्रेतसंबंधतानुसा
मान्यरूपेणेवेति ध्येयं। एकमिति तादृशकारणतास्यलेसामग्रीव्याप्ते नानाव्यापक
ताविशिष्टस्यैकस्य निवेश इत्याशयः अन्यथा सामग्रीव्याप्ते नानाव्यापकताविशिष्टा
याएकव्यक्तेरनिवेशे। उक्तातिप्रसंगः उक्तस्यातिप्रसंगः तमेवाह अधिकरणेतिप्रत्या
सन्नत्वादिति काले आत्मनि चेत्यादिः नकिंचिदिति व्यक्तिद्वये कालिकदैशिकव्यापक
तयोः सत्वेनोक्तस्यलेतिप्रसंगवारणाय तादृशैकव्यक्तिनिवेशस्यावश्यकतया न
पूर्वोक्तातिप्रसंग इति प्रघट्टकार्थः। वाच्य इति तथा चानागतविषयकेच्छानुरोधेन
सामान्यलक्षण्यावश्यमुपेयेति हृदयं। प्रत्यासत्तित्वमितिशास्त्रे ज्ञानमित्यादि प्रत्य

भवानं·टी
४९
५५

येनविषयतासंबंधोपि वृत्तिनियामक इत्याशयस्तेन न पूर्वापरविरोधः। अविशेषादिति। यथा
र्थयिपार्थेच्छारूपकार्यजनकयोरित्यादि। दोषाभावभेदाग्रहादीति दोषाभावसहित
भेदाग्रहादीत्यर्थः आदिनादोषसहितभेदाग्रहपरिग्रहः। वस्तुतस्तु यथासंख्येनान्वया
भिप्रायेण यथाश्रुतमेव सम्यक्। आदिना स्वत्ताभावाग्रहपरिग्रह इति। उपपन्नेरिति
तन्मते त्वविशेषादेव सहकारिवैलक्षण्यासंभवं इत्याशयः। दोषितो विशेष इति यस्ता
मान्येपस्सामान्यमित्यादिन्यायादिति भावः। ख्यापयांकरत्वेति लघोरित्यादि। दोष
स्यैव। रजतत्वग्रहप्रतिबंधकदोषस्यैव। उपस्थितमिति इदं चानुपस्थिते चेत्यादि पूर्वोक्त
दोषनिरासायोक्तं। तस्य योर्भेदाग्रहः तन्निष्ठयोः रजतभेदाग्रहः। एवमग्रेपि दीधितौ राम
हेतुरिति। सामानविषयत्वप्रत्यासत्त्या हेतुरित्यर्थः। न च एतन्मते अनागतविरोध्य ४९
केच्छानुरोधेन सामान्यलक्षण्यासिद्धिरावश्यकी वाच्यं। असिद्धोपरागे सासिद्ध
येच्छाविषय इत्यापाद्य। अत एव विसंवादीच्छास्थले ऽनागता रजतोपस्थित्यर्थे

तासिद्धिरावश्यकीत्यपि निरस्तं वस्तुतस्तु हेतुरित्यस्य सामान्यत आत्मनिष्ठप्रत्यासत्त्या
हेतुरित्येवार्थ इति सारं सामान्यलक्षणानभ्युपगन्तुरेव कस्यचिदेवेति नोमतं प्रसंगाद्दू
षितमित्याहुः । ननु यत्र लिंगासंसर्गाग्रहात्साध्यासंसर्गाग्रहस्तत्रोयथार्थज्ञानत्रय
मि चत्रेण कारणस्य यथार्थत्वायथार्थत्वस्येच्छायथार्थत्वायथार्थत्वे नियामकत्वासंभवे
नमद्गुरुक्तरीत्यादर आवश्यक इत्यत आह तद्विशेष्यापीति । व्याख्यायां उपस्थित्यर्थमपीति
अपिरवधारणे यथा उपस्थित्यर्थमपीति । भेदाग्रहकारणतावच्छेदकीभूतोपस्थि
त्यर्थमपीत्यर्थः पूर्वसिद्धविषयकतत्प्रकारज्ञानत्वेन कारणत्वस्याभ्युपगमात् अपि ना
कारणीभूता नागतगोचरज्ञानमित्यस्य समुच्चयः ननु सिद्ध एवोपस्थिते रजतेऽ
सिद्धोपरागेणेच्छा स्वीत्यत आह । हृदयमिति सिद्धानुपरागेणाप्यसिद्धविषयके
च्छाया आनुभविकत्वादिति भावः वाच्छेति । रजतभेदाग्रहप्रतिबंधकत्वेन दोषाणा
मनुगमादिति भावः अविरोधित्वादिति रजतत्वांशेऽन्याप्रकारकेच्छायां तादृशाग्रहे से

त्वविरोधितयारजतत्वाभावग्रहस्यरजतत्वांशेरजतत्वप्रकारकत्वादितिभावः अनुभ
वेनतस्यापिविरोधित्वमित्याशयेनाह। तथात्वेपीति। आत्मनिष्ठतयेतिवाक्वचित्क्यादि
रजतस्यादृश्यज्ञानमेवदोषइत्यभिप्रेत्येदं। भ्रमात्। रजतांशेप्रमात्मकभ्रमस्यविषय
निष्ठतयेतिरजतसादृश्यमेवदोषइत्याशयेन। यथाकथंचिदितिभेदाग्रहविशेषणंहे
याप्रयोज्यत्वस्यार्थः। तादृशेच्छेति। उपस्थितेघटादावभ्रांतस्येत्यादिविसंवादीच्छेत्यस्यार्थः॥
ननुसंवादिन्यामुपस्थितरजतभेदाग्रहहेतुतायेद्वयोर्लाघवेनस्वप्रकारीभूतरजत
त्वाश्रयत्वसंबंधेनरजतत्वज्ञानत्वेनहेतुत्वमेवोचितमितिसिद्धरजतज्ञानादेवानाग
तरजतगोचरेच्छासंभवात्तदनुरोधेनसामान्यलक्षणावश्यकत्वमतआह। इत्यादि राम
कमूह्यमिति। अयमाशयः आर्थसमाजग्रस्तस्यकार्यतानवच्छेदकतयाप्रमात्वादि ५०
वत्संवादीच्छात्वादिकंनकार्यतावच्छेदकमितिइच्छाज्ञानयोः समानप्रकारकत्वसमान
विशेष्यकत्वाभ्यामेकमेवहेतुत्वमितिअनागतगोचरेच्छानुरोधेनसामान्यलक्षणावश्य

कीतिसमानविशेष्यकत्वेनज्ञाने ८ यो हेतुत्वेपि नानागतगोचरेच्छानुरोधेन सामान्यलक्षणासि
द्धिः सिद्धगोचरेच्छाया एवाभ्युपगमात् असिद्धविषयकेच्छाया आनुभविकत्वस्यैवासिद्धेरित्या
शयेनाह दीधितावत्राहुरिति व्याख्यायां असिद्धइति अतोनतज्ज्ञानार्थं सामान्यलक्षणाद्वार इत्या
शयः लाघवादितीति लाघवं चविरोधीत्वं तस्यार्थे हेतुः लाघवादिति दिगित्येति स्वरूपसदित्या
दिनाकांक्षासमरणज्ञानस्यैवेति अभेदषष्ठी भवस्यैवेति तथा चाज्ञातेत्यादि व्यर्थमिति भावः अभ्यु
पेत्यैवेति। तथा चेच्छायां बाधनिश्चयस्य विरोधित्वपक्षेपीच्छासामग्रीघटनाया ज्ञातेत्यांशुक
मितिभावः दीधितावसत्त्वादिति अप्रसिद्धत्वादित्यर्थः। ननु विशेषदर्शिनः सामान्यधर्माव
च्छेदेन सिद्धत्वज्ञानासंभवेन सामान्यधर्मप्रकारकेच्छा कदापि नोच्छिद्येतेति तत्प्रकारकेच्छा
यां तत्प्रकारसामानाधिकरण्येन सिद्धत्वज्ञानस्यैव विरोधितयाऽसिद्धेरिच्छानुरोधेन सा
मान्यलक्षणास्वरूपकीर्त्तोषितस्य तत्त्वदलोकनत्वसामान्यलक्षणयोपस्थितभाव्यवलोक
ने तत्कांक्षीयत्वभ्रमे सिद्धतन्नदवलोकनेतरतत्कांक्षावलोकनत्वेनेच्छेति न कथमित्यत नेनो
क्तदोषावकाश इति चेदत्राहुः सत्यपि सामानाधिकरण्येन सिद्धत्वज्ञाने इच्छाया अनुभ

मधानं॰ पी वसिद्धत्वेनावच्छेदकावच्छेदेन सिद्धत्वज्ञानमेव प्रतिबंधकं न चैवं विशेषदर्शिनः सिद्धत्वज्ञानद्
५१ त्तस्त्रांतस्य सामान्यप्रकारकेच्छाविच्छेदेन स्यादिति वाच्यं इष्टापत्तेः तदुक्तं न जातु कामः कामा
51 नामुपभोगेन शाम्यतीति अस्यार्थः इच्छाविषयसिद्धज्ञानेच्छाविच्छेदः किंतु सुखोपायेऽतिभी
जनादौ रोगादिदुःखानुसंधित्वस्यानप्रयुक्तद्वेषे सेवेतीति तार्किकचक्रवर्तिनस्तु अत्र सा
नकांतामरणस्यापि शोकार्तस्य तत्र एवं लोकनेच्छानुभवसिद्धेति सर्वमिदमाया तत एव विचा
रितं । अत एव मिथ्याणां तास्वर्यग्रंथी यं ज्ञातपुत्रमरणस्य शोकार्तस्य तत्पुत्रदर्शनेच्छेत्य
भिधानमपि संगच्छते । वस्तुतस्तु यद्धर्मप्रकारिकेच्छा तत्प्रकारको निर्णय एव सिद्धत्वनि
श्चयः ते च धर्माः स्ववृत्तित्वसंबंधावच्छिन्नस्ववृत्तित्वस्वत्वपुत्रादिवृत्तित्वादयो बहुतराः प्र राम ५१
कृते च कांतावलोकने इदानीं स्ववृत्तित्वप्रकारिकेच्छा सा च तत्प्रकारकनिश्चयाभावात्प्रातु
व पत्रानचैवं सामान्यलक्षणापत्तिरपि । यत्प्रकारकनिश्चये सति निश्चये सतीच्छा न
घते अन्वयव्यतिरेकाभ्यां स एव प्रतिबंधकः स एव च सिद्धत्वनिश्चयस्ते च धर्माः स्ववृत्ति
त्वादयः पूर्वोक्तास्तद्धर्मप्रकारकनिश्चयाभावात्सामानानुपपत्तेरिति किं सामान्यलक्षणयेति

स्याहुः। वस्तुतस्तु उक्तास्वरसस्य एव दीधितिकृता ग्राह्यत्वादिस्फुरितत्वाच्चितिइति ध्येयं। ननु तत्प्रका
रके च्छायां तद्धर्मावच्छेदेन सिद्धत्वज्ञानस्याविरोधित्वेन संभवति एतज्जनत्वावच्छेदेन सिद्धत्वज्ञा
नकालीनायामेतज्जनस्वत्वंभेभवतीति छायां व्यभिचारादित्यत आह इत्याद्रिकमिति तद्धर्मा
वच्छिन्नोद्देश्यताके च्छायां तद्धर्मावच्छेदेन सिद्धत्वज्ञानं विरोधि उपदर्शितेच्छायां चैतज्जन
स्वत्वत्वमेवोद्देश्यतावच्छेदकं न तत्वे तज्जनत्वमिति नोक्तव्यभिचारः उद्देश्यत्वं च भवति स्याद्रि
पत्ताभिलप्यमानो विषयतादिविशेष इति भावः व्याख्यायां गुर्विति इच्छां चाप्रामाण्यज्ञाने ऽप्रा
माण्यज्ञानं नोद्देजकमित्याशयेन तत्रेति अप्रामाण्यज्ञानाभावस्य कारणतावच्छेदककोटौ
वनिवेशादिति भावः अज्ञातकांतास्मरणस्यतत्कांतावलोकने इच्छोत्पत्त्यर्थं सिद्धत्वे
अज्ञात एवासिद्धत्वज्ञानमकार्ये नाधिकत्वया स्वीकार्यमित्यस्याकमर्पितत्वेत्याशयेना
हदीधितौ विशेषरूपेणासंभवादिति समानप्रकारकत्वे नैव विरोधित्वादिति भावः
ननु अन्यथाख्यात्यनंगीकर्तृगुरुमते सिद्धेऽसिद्धत्वज्ञानमसंभवीत्यत आह तदेकमि

भक्तानं.टी.
५२
52

त्ति। अशक्यत्वाच्चेति। तथा चागत्या सिद्धेऽसिद्धत्वभ्रमजनकदोषसत्त्व एवेच्छोत्पत्त्यंगीकारे य
त्र सिद्धेऽसिद्धत्वभ्रमजनकदोषाभावस्तत्रेच्छानुत्पत्त्या विघ्नापत्तिरेवेति भावः व्याख्यायां
वर्त्तमानप्रागभावेति। इदमुपलक्षणं प्रागभावानंगीकारे वर्त्तमानकालध्वंसाधिकरण
कालोऽप्यन्तिकमित्यपि द्रष्टव्यं पक्षधर्मताया त्वादिति इदं चानुमानेपि तुल्यविति वे घटत्वां
गीकारेऽन्यकालपक्षकानुमाने नैव सुखविशेष्यकासिद्धत्वज्ञानमित्याशयेन तदंगीकारे
तु तन्मूलकोपनीतभानादिति द्रष्टव्यं। स्वरूपेति अतीतव्यावृत्तवर्त्तमानप्रागभावप्रति
योगित्वात्मकेऽर्थः प्रागभावप्रत्यक्षासंभवादिति वाच्यं। सुखोऽस्मादित्यादिसाध्यकानु
मानादनागतसुखोपस्थितौ तदंशेऽपनीतभानात्मकप्रागभावप्रत्यक्षरूपसाध्यप्रसि
संभवात् मानाभावे त्विति इदमुपलक्षणं उक्तरीत्या साध्यनुरोधेन सुखो स्यादित्यादि
साध्यकानुमानस्याप्रयोजकत्वादित्यपि बोध्यं। असिद्धत्वस्वरूपेति। अतीतव्यावृत्तसु
खोत्पत्त्याद्यात्मकेऽर्थः उद्देश्यासिद्धीति। असिद्धत्वस्वरूपालाभ इत्यर्थः कृत्यसि

राम
५२

तिदृशांशपक्षसाधारण्यैकसाध्यासंभवादितिभावः ननु घटादाहकालिकतद्ध्वंसस्यावच्छि
न्नत्वसंबंधेनेति अनागतस्य स्वस्वोत्पादक्षणे स्वनिष्ठध्वंसस्यावच्छेदकं सिद्धसुखं च
स्वद्वितीयक्षणे स्वनिष्ठध्वंसस्यानावच्छेदकं तस्य तादृशध्वंसानधिकरणप्रथमक्षणवृ
त्तित्वेनातिप्रसक्ततयानवच्छेदकत्वादित्यसिद्धत्वस्वरूपलाभ इति भावः अनुगतत्वा
दिति अनुगतसाध्यसामानाधिकरण्यात्मकत्वादित्यर्थः तथानुगततादृशप्रतियो
गित्वमेवकालपक्षकानुमाने साध्यमिति भावः तदभ्युपगमेत्विति तत्र व्यभिचारा
दिति शेषः । अंत्ययोर्वाच्येति महाप्रलयावच्छिन्नतत्पूर्वेत्यर्थः व्यभिचारे इति तयोर्धर्म
स्यक्रियादिरूपजन्यभावाधिकरणत्वादिति भावः । इदानीं तन्ननित्यध्वंसावादाय
महाप्रलये व्यभिचारवारणाय जन्यभावेति ।। दीधितावनुमानजन्यत्वात् । तद
नंगीकारेतु प्रयोज्यत्वमेव पंचम्यर्थः असिद्धत्वज्ञानस्यानुमानरूपत्वकोपनीतभा
नात्मकत्वादिति ध्येयं । व्याख्यायां पाकानुमाने इति पाकविशेष्यककृतिसाध्यकेत्यनु ता

 मानेत्यर्थः। तत्रानागतपाकज्ञानाभावेन सिद्धपाकविशेष्यकपरामर्शादेवानुमितेरप
 स्य धर्मितावत्त्वेनानागतपाकमानमित्याद्येवंरूपमावश्यकत्वादिति भावः। अपेक्षायामसि
द्धत्वग्रहस्यतदाघवाधेद्धत्वे ऽनुमितावप्यबाधितत्वधीरेव हेतुः स्यात्तद्बाधनिश्चया
भाव इत्यत आह दीधितौ विलिख्य तं पल्लवितेनेति घनगर्जितेन मेघानुमितावप्रसिद्ध
साध्यिकायां च तस्यां व्यभिचारेणानुमितावबाधितत्वज्ञानस्य हेतुत्वं न संभवतीति भा
वः केचित्तु सिद्धत्वासिद्धत्वयोरज्ञानेपीच्छोत्पत्तिसंदेहेन सिद्धत्वनिश्चयाभाव एव तत्
त्र हेतुर्निश्चितात्वभिचारकत्वात्। किंचासिद्धत्वसंदेहोत्तरं सिद्धत्वनिश्चयेपीच्छावारणा
य सिद्धत्वनिश्चयाभाव एव हेतुः सिद्धत्वज्ञानहेतुत्वप्रतिपादको दीधितिग्रंथस्तु तन्मते नु 
त्वेपि न सामान्यतत्त्वस्य सिद्धिरित्यभ्युपगमवादेन न तु वास्तविकतन्त्रेतुतापर इत्या 
हुः आकारशब्दस्य प्रकारतात्पर्यकत्वमभिप्रेत्याह व्याख्यायां न केवलमिति। ननु घटी
नेवेति घटत्वकोटिकसंशये घटत्वस्येव कोटितावच्छेदकतया कोटितावच्छेदकघटत्वां

शेऽस्यासंगतत्वमत आह। घटेन वेत्तीति। विशेषदर्शनेन तथा व्याप्यदर्शनेन तथा व्याप्यदर्शनमेव
घटव्याप्यदर्शनमेव स्यात्तं प्रत्येव व्यावर्तकधर्मदर्शनं तथा। किं त्विति अत एवात्र घटसं
देहे भिन्नत्वनुक्त्वा घटत्वव्याप्यत्वसंदेहमिति दीधितावुक्तमिति ध्येयं विरोधित्वेनेति तस्यैतत्त्वा
प्यदर्शनत्वस्याविरोधित्वासंभवादिति भावः। तथोक्तं स्यात्तं प्रत्येव विरोधित्वमुक्तं अत एव स्वा
तं प्रत्येव विरोधित्वस्याभिप्रेतत्वादेव। यद्वा तादात्म्येन घटसंबंधीतरावृत्तित्वेन निश्चयस्यैव
घटव्याप्यवत्तानिश्चयत्वेन यद्यपीत्याद्याशंकाऽसंगताः किं च तथापीत्यादिसमाधान
मप्यसंगतं। घटेतरावृत्तित्वस्य घटभेदाभावव्याप्तित्वादिति केचिद्दूषणमुद्भावितं त
द्रसत् तादात्म्येन साध्यत्वं लाघवेन साध्याभाववदवृत्तित्वस्यैव व्याप्तित्वात्। किं चैत्या
दिकमपि मंदं। तेन संबंधेन तद्धर्मावच्छिन्नकोटिकसंशयं प्रति तत्संबंधावच्छिन्ना
भावघटितव्याप्तिविशिष्टधर्मवत्ताज्ञानस्यैव विरोधितया तादृशाभावत्वेन तत्प्रतियोगि
तावच्छेदकरूपेण च तत्प्रवेशाद् एव व्याप्यवत्ताज्ञानमुद्रयाऽविरोधित्वात्। इत्यस्येति

धीधि त्तिरूहुक्तस्य तत्प्रनरत्नं स्वसामग्री विरहादिति मूलार्थस्येत्यर्थः असंगतत्वेति। तस्मा
न्निर्विकल्पकाभावस्यैव तादृशज्ञानाभावप्रयोजकत्वलाभादित्याशयः तादृशदोषा
भावः संशयजनकदोषाभावः असर्वज्ञापरिच्छेद्यत्वयापत्रेत्यादि नोक्तस्थलविशेषस्ये
व दौर्लभ्यं सौलभ्येव ऽ तादृशस्थलविशेषानुसरणं क्लेशसहिष्णुतानुचितेत्याशयेनान्य
थैव स्वयं मूलाशयं वर्णयति। वस्तुतस्त्विति। अयमाक्षेपः न च सर्वसत्त्वेनेत्यादि मूलो
क्ताक्षेपः तादृशेति। प्रमेयवानित्याकारकेत्यर्थः समानविषयत्वमात्रेण प्रतिबंधकता
वादि प्राचीनमतानुसारेणाह परकीयज्ञानेति समानप्रकारकत्वेन प्रतिबंधकतावादि राम
नवीनमतानुसारेणाह। परस्तादृशेति। विशेषदर्शनस्य घटत्वप्रकारकतादृशज्ञान ५४
नत्वव्याप्यत्वस्य त्ववत्ताविरोधि यस्य। अत एव मूलोक्तसंशयेपदे नोक्तसंशयस्याभिप्रेत
त्वादेव। इत्युक्तमिति अन्यथा तदुक्तेर्निष्प्रयोजनत्वमेव स्यादिति भावः। आक्षेपता
त्पर्यमुक्त्वा सिद्धांततात्पर्यमाह सर्वस्येति। तादृशेति घटत्वप्रकारकेत्यर्थः। तादृशेति

घटत्वांशेऽस्याप्रकारकेत्यर्थः ॥ एवमग्रेपि घटत्वावेति घटत्वप्रकारकत्वावेत्यर्थः ॥ ॥
सामान्यलक्षणव्याख्यामाकृत्वाऽसामान्यलक्षणाविद्वांसस्संतुष्यंतु श्रीतातस्तयाऽसा
मान्यलक्षणः ॥ ॥ इतिश्रीमत्पुरणतामकरोपनामकमन्महादेवपंडितविर
चितेनुमानमणिदीधितिव्याख्याभवानंदीव्याख्यानेभवानंदीप्रकाशाभिधेसामान्य
लक्षणप्रकाशःसमाप्तः ॥ ॥ काशीवासीमालईविप्रमिश्रगनराम॥ सपननगा
रमेलिखतहैसपननगरविश्राम॥ ॥ इदंपुस्तवालमुकुं[redacted]दपंडितस्येदं
इदम्॥ ॥ स्वार्थंपरार्थंच॥ ॥ तैलाद्रक्षेजलाद्रक्षेद्रक्षेद्दृढबंधनात्॥ मू
र्खहस्तेनदातव्यएवंवदतिपुस्तकम्॥ ॥ ऐश्वर्यमस्तु॥ रिपुक्षयोस्तु॥ छ॥

पत्रे ५५

श्लो:
१८१५

६६